आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

## अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्

**(Bi-annual Refereed Sanskrit Research Journal)**

विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्तम्

**संस्कृतप्रसारपरिषद्**

**आरा (विहारः)**

अष्टाविंशं वर्षम्-द्वितीयोऽङ्कः, नवविंशं वर्षम्-प्रथमोऽङ्कः
सितम्बर 2020-मार्च 2021

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784

   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 09431451895,
   Email-nilmanipathak19@gmail.com

   **(ii) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् (गुजरात)-362266 इति सङ्केतेन** (चलः) 09450870788 विधेयः।
    Email-gopabandhuh@gmail.com
11. आरण्यकस्य बेबसाईट-www.aranyakam.in

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी संस्कृतशोधपत्रिका

वर्षाङ्कौ - अष्टाविंशं वर्षम् - द्वितीयोऽङ्कः, नवविंशं वर्षम् - प्रथमोऽङ्कः
संयुक्ताङ्कः

**आश्विनः, वि.सं.२०७७-चैत्रः, वि.सं.२०७८**

**सितम्बर २०२० - मार्च २०२१**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 50 रूप्यकाणि*
*संयुक्ताङ्कः - 100 रूप्यकाणि*

*वार्षिकं शुल्कं 100 रूप्यकाणि*

**परामर्शदात्री समितिः**


डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया


❁

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❁


सम्पादकः

**प्रो.गोपबन्धु मिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)

gopabandhuh@gmail.com

❁

सह-सम्पादकौ

**डॉ. सञ्जय कुमार चौबे**

sanjaychaubey.lbs@gmail.com

**डॉ. सुनीलकुमार प्रधानः**

sunilkumarp435@gmail.com


❁


प्रकाशिका

**संस्कृतप्रसारपरिषद्**

रामेश्वरलीलासदनम्

महावीरस्थानम्

मौलाबाग, आरा (विहारः) 802301

❁

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**

सम्पादकः

# सम्पादकीयम्

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधाख्ये दशमाध्याये देव्या शुम्भवधात् परं वर्णनमित्थमस्ति–

**स ( शुम्भः ) गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः।**
**चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम्।।**
**ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि।**
**जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन् नभः।।**
**उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः।**
**सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते।।**
**ततो देवगणाः सर्वे हर्षनिर्भरमानसाः।**
**बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः।।**
**अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः।**
**ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद् दिवाकरः।।**
**जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः।।**

(श्रीदुर्गासप्तशती 10.27-32)

शुम्भस्येव प्रचण्डराक्षसस्य निधनात् परं सम्पूर्णजगतः स्वस्थतायाः वर्णनमिदम् आधुनिकसन्दर्भे विविधैः बाह्यैराभ्यन्तरैश्च कारणैः आध्यात्मिकाधिभौतिकाधिदैविकेतितापत्रयेण पीड्यमानस्य जगतः अस्वस्थवृत्तेः स्वरूपं विज्ञापयितुं प्रभवति। विशिष्टतया 'कोरोने'ति जीवाणुकारणेन अखिलस्य मानवजगतः सन्तापः, जीवनहानिः, आतङ्कितता चेति दशां विलोक्य जगतः वास्तविकं स्वास्थ्यं किंरूपं भवति किंरूपं भवेदिति वा उपर्युक्तात् उद्धरणात् तद् विज्ञाय आधुनिकम् अस्वास्थ्यं सुतरां विमर्ष्टुं शक्यते।

उपर्युक्तोद्धरणाधारेण सद्यः व्यापको भयङ्करश्च दुरात्मा 'कोरोना'–कीटाणुजन्यो व्याधिरिति विशिष्टतया कथयितुं शक्यते। एतस्मिन् दुरात्मनि शासति सम्प्रति जगत् स्वस्थतां नावाप्नोति, अर्थात् जगत् स्वस्मिन् न तिष्ठति (स्वस्मिन् तिष्ठति स्था + क

= स्वस्थः), स्वाभाविकतया सुखदुःखमोहस्वभावैः सत्त्वरजस्तमोभिः गुणैरन्वितं सत् प्रकाशप्रवृत्तिमोहयुक्तं सहजं जगत् नास्ति, केवलं दुःखस्य मोहस्य वा रजस्तमोऽन्यतर-प्रभावजस्य बाहुल्यात् इति यावत्। जगतः स्वास्थ्यस्य कतिपयं प्रमाणस्वरूपं लक्षणं यत् प्रकृतोद्धरणे प्रदर्शितं तदेवमस्ति–(1) सोल्कानाम् उत्पातमेघानां शान्तिः, (2) सरितां मार्गवाहित्वम्, (3) देवगणानां हर्षनिर्भरमानसत्वम्, (4) गन्धर्वाणां लालित्यम्, (5) अन्येषां गन्धर्वाणां वादकत्वम्, (6) अप्सरोगणानां नृत्यम्, (7) वातानां पुण्यतया प्रवाहः, (8) दिवाकरस्य सुप्रभत्वम्, (9) शान्तानाम् अग्नीनां ज्वलनम्, (10) दिग्जनितस्वनानां शान्तिः इति। अर्थात्, यदा पर्जन्याः उत्पातमेघाः भूत्वा अतिवृष्टिम् अनावृष्टिं वा न कुर्वन्ति, अपि तु 'काले वर्षन्तु पर्जन्याः' इति अस्मदभीप्सां पुरस्कृत्य समये वर्षन्ति, तदा ते शान्ताः तन्नाम उपकारिणः जगत्स्वास्थ्यप्रदाः इत्यतः शान्ताः इत्यभिधेयाः सन्ति।

किं च, सरितो यदा अतिवृष्टिकारणेन स्वमार्गं परित्यज्य जलप्लावनेन विशालं भूखण्डं व्याप्नुवन्ति तदा अस्वास्थ्यम् आगच्छति। अथ च स्वमार्गेषु वहन्त्यस्ताः सुतरां सर्वेषां प्राणिनां हितमाचर्य स्वस्थतां जनयन्त्येव।

श्रीमद्भगवद्गीतोक्तरीत्या मनुष्ये निम्नोक्ताः दैव्यः सम्पदः विद्यमानाः सन्ति–

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥**
**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥**
**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति सम्पदं दैवीमभिजातस्य भारत॥**(गीता 16.1-3)

एतासां दैवीसम्पदां विकासेन मानवान्तः विद्यमानं देवतत्त्वं हर्षनिर्भरमानसं भवतीति तदेव मानवस्य स्वास्थ्यमिति विज्ञातुं शक्यते।

यदा मानवसमाजः सभ्यः स्वस्थः प्रसन्नश्च भवति तदैव उत्तमनृत्यगीतवाद्यादिललित-कलानाम् अभ्युदयः सम्यग् विकासश्च भवतीति सर्वविदितमिदं तथ्यम्। आतङ्के भीतौ परस्परम् अविश्वसनीये परिवेशे वा ललितकलायाः एते पक्षाः स्वयमेव कुण्ठिताः स्वाङ्गजीर्णसुभाषिताः भवन्तीति तेन अस्वास्थ्यकरत्वं परिवेशस्य सुतराम् अवगन्तुं शक्यते।

तथैव वाताः सुशीतलाः वहन्ति, दिवाकरोऽपि स्वतेजसा स्वप्रभया सुप्रभो भवति

चेदपि कोरोनादिजन्यभीतिकारणेन बहिर्निष्क्रमणाभावात्, कदाचिच्च बहिर्निष्क्रमणदशायामपि वातस्य पुण्यत्वं मन्दत्वं दिवाकरस्य सुतेजस्कत्वं च नानुभूयते इति नूनमेव अस्वास्थ्यमिदम्।

तद्वत् गृहे गृहे गृहस्थानां पाकादिकर्मणि शान्ततया नियमिततया च अग्नीनां ज्वालनम् अभूत्वा याथातथ्येन अशनपिपासानिवृत्तिः प्रवर्तते चेत् समाजः स्वस्थः नास्तीति वक्तुं शक्यते। साम्प्रतिककाले विविधसमाजेषु भारतीयजीवने नानाविधोत्सवे समारोहा-दिषु यः गणभोजनप्रसङ्गः सामान्यतया प्रभवति स्म, स न दृश्यते इति समाजस्य अस्वास्थ्यमेवेदमिति कथयितुं शक्यते। तथैव जनानां विविधमेलनसमवायादिप्रसङ्गे बालानां महिलानां सर्वेषामन्येषामपि यः आनन्दस्वनः स्वतः एव परिवेशं मुखरयति स्म, तस्य सुतराम् अभावोऽपि नानन्दयति कस्यापि चेतः, नोत्प्रेरयति च कमपि सोत्साहं सामाजिकं गणजीवनं च जीवनं जीवितुमिति एषा स्थितिः भावात्मकताम् अजनयित्वा अभावात्मकताम् उदासीनतां च सूचयति। एतेन एतदपि ज्ञायते यत् स्वनानां वातानां सूर्यस्य वा शान्त-स्थितिर्नाम तत्तद्गतसहजप्रवृत्तिः आनुकूल्येन सञ्चरणमिति, न तु उदासीनतया अथवा अननुभूततयेति।

'कोरोना' तथा च तत्तुल्यसङ्कटः सुतराम् अपगच्छतु, पुनरपि जगत् 'स्वस्थं' सत् स्वाभाविकतया सञ्चरत्विति सर्वेषामेव एषा अन्तःस्था अभीप्सा सदिच्छा च परमेश्वरस्य परमकल्याणभावनां सुतराम् उत्प्रेरयिष्यत्येव किं च एतेषां प्रतिकूलपरिस्थितिजनकानां नाशनेन सर्वत्र सच्चिदानन्दस्वरूपस्य परमात्मनः प्रसादः प्रसरिष्यत्येवेति आशास्यतेतराम्।

'आरण्यक'मिदं सम्प्रति यू.जी.सी. यत्नसूच्याम् (UGC Carelist) आगतमिति सहर्षं सूच्यते। अस्य नियमितप्रकाशनं, नियतस्तरानुसरणं तथा च संस्कृतवाङ्मये विविधशास्त्रेषु विद्यमानानाम् अखिलज्ञानराशीनां तत्त्वविशेषानादय आत्मकलेवरालङ्करणमिति सकलमिदम् अभीष्टं विदुषां सहयोगसमभाव–नियमितप्रतिभावैः पूर्णतां यायादिति विनिवेद्य विरम्यते।

गोपबन्धु मिश्र

**विदुषां वशंवदः**

**सम्पादकः**

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. शान्तिपाठः | स्वामी जपसिद्धानन्दः<br>अध्यक्षः, संस्कृत-दर्शन-विभागः, रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य, बेलुडमठपदस्थस्य | 1-13 |
| 2. कार्तवीर्योदयमहाकाव्ये शब्दशास्त्रीय-दर्शनसम्बद्धाः विषयाः | डॉ. तेजनाथपौडेलः<br>सहायकाचार्यः, केन्द्रीयसंस्कृत-विश्वविद्यालये, श्रीरणवीरपरिसरे, जम्मूः | 15-22 |
| 3. कुमारसम्भवे कालिदासस्य वक्रोक्तिविन्यासपूर्वकललितार्थ-निबन्धने नैपुणी | डॉ. राजकुमार मिश्रः<br>सहायकाचार्यः, साहित्यविभागः हरियाणासंस्कृतविद्यापीठम्, बघौला, पलवलम्, हरियाणा | 23-29 |
| 4. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 30 |
| 5. ङमुड्विधायकसूत्रे नागेशभट्टोजि-दीक्षितोर्मतवैचित्र्यम् | डॉ. गणेश्वरनाथ झा<br>सहायकाचार्यः, व्याकरणविभागः एकलव्य कैम्पस (केन्द्रिय संस्कृत विश्वविद्यालयः), अगरतला | 31-44 |
| 6. विविधदार्शनिकदृष्ट्या लक्षणाविषयकं निरूपणम् | राहुलपोखरियालः<br>शोधच्छात्रः | 45-52 |
| 7. संस्कृतसौरभसञ्चयनम्-परिशिष्टम् घटकर्परकविप्रणीतं घटकर्परकाव्यम् | सम्पादकः<br>डॉ.बबुआ नारायण मिश्रः<br>संस्कृतशिक्षकः, केन्द्रीयविद्यालयः सिलचर (असमः) | 53-82 |


***

# शान्तिपाठः

**स्वामी जपसिद्धानन्दः**

**शोधलक्ष्यम्–**उपनिषदाम् अध्ययने आदौ अन्ते च शान्तिपाठः क्रियते। शान्तिपाठः इति किम्? कः मन्त्रः क्व क्रियते, इत्यादीनां यथासाध्यं समीक्षणम् अधीतार्थस्य सङ्क्षेपेण उपस्थापनं च अस्य पत्रस्य लक्ष्यम्।

**शोधप्रविधिः–**सङ्कलनात्मिका पद्धतिः अत्र आश्रिता। मध्येनिबन्धनम् उदाहृतौ, आश्रितग्रन्थावलौ च एम्.एल्.ए सरणिः संश्रिता। एम्.एल्.ए क्रमे विपरिणामाः संस्कृतोचिताः विहिताः पठितॄणां परामर्शसौकर्याय। यथा–(कश्यप। भा.2,पृ.672, मनु.11.249) इत्यत्र अयं क्रमः–ग्रन्थकर्त्रादिनाम/पृष्ठक्रमाङ्कः/ग्रन्थनाम/अध्यायसङ्ख्या/श्लोकसङ्ख्या इति। पाणिनीय–सूत्रसङ्ख्योल्लेखे आदौ अष्टाध्याय्याः क्रमिकसङ्ख्या, ततः सिद्धान्तकौमुद्याः दर्शिता अध्ययनसुखाय। ग्रन्थादेः कालनिर्देशे सर्वत्र खैस्ताब्दं बोध्यम्।

## 1. उपक्रमः

विश्वशान्त्यर्थं सम्प्रति संस्थाः क्रियाशीलाः। साक्षात् पारम्पर्येण वा सर्वैः शान्तिः मृग्यमाणा वर्तते। विज्ञानं तन्त्रकौशलं च यावता परिमाणेन वर्धते तावता मानेन उपद्रवाः अतिशेरते इत्येतत् प्रेक्षावतां न तिरोहितम्। अतः शान्तिः आशंस्यते निखिलैः देशैः। अद्यत्वे विश्वशान्त्यर्थं परिश्राम्यन्तः सभाज्यन्ते विश्ववेदिकासु। वेदकाले महर्षिभिः अनुदिनं **विश्वशान्तिः प्रार्थयाञ्चक्रे।** न च ते सभासु सभाजिताः। तथाऽपि तैः शान्तिशंसनं न परितत्यजुः। निःस्वार्थेन स्वान्तेन तैः अनवरतं शान्तिः व्यतन्यत। मुक्तपुरुषाः ब्रह्मज्ञानिनश्च अनिशं सर्वेषां हितं मङ्गलं च आशंसन्ति इत्युक्तं वेदेषु। तथाहि तैत्तिरीयारण्यके ध्वनितम्– "अग्ने अत्रिवन् मनसा..." इत्यादिमन्त्रेण (राडवाडे। भा.2, पृ.949, तै.आ.10.1.53)। तन्मन्त्रं व्याख्यायन् सायणाचार्य आह–जीवन्मुक्तः महर्षिः स्वयं दुःखविनिर्मुक्तः सन् सर्वाणि भूतानि आत्मना तुल्यानि पश्यन् "सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः" इत्येवं मनसा सर्वदा आशंसते इति।[1] एवं लोकहितैषिणः सहस्रशो बभुवुः भारताः। अत एव अद्यापि भारतं समग्रे महीतले शान्तिधाम इमि महीयते। गवां पशूनां सरीसृपाणां

यादसाम् ओषधीनां वनस्पतीनां नराणां देवानाम् इत्येवं सर्वेषां शान्तिः प्रार्थिता महर्षिभिः। ऋषयस्ते महात्मानः न केवलं प्रातःस्मरणीयाः प्रत्युत सदा स्मरणीयाः। तैः विहितः शान्तिपाठः चेतः चेतयते, शान्तिं वितनुते।

## 1.1. शान्तिशब्दार्थः

शमः शान्तिः इति भावार्थे निष्पन्नोऽयं शब्दः शान्तिरिति। शमु उपशमे इत्यस्माद् दिवादिगणीयाद् अकर्मकाद् सेटः परस्मैपदिनः धातोः **स्त्रियां क्तिन्** (3.3.94/3272) इत्यनेन भावे क्तिन्–प्रत्यये, **अनुनासिकस्य क्विझलोः क्ङिति** (6.4.15/2666) इति अङ्गस्य उपधायाः दीर्घे शान्तिः इति रूपम्। शमः, प्रशमः, उपशमः, शमथुः इत्यादयः शान्तिसमवाचिनः। ''शमथस्तु शमः शान्तिः'' इत्यादिकोषात् (दाधिमथः, पृ.387)'' शान्तिशब्दस्य मङ्गलम् इत्यपि अर्थः विद्यते। ''शान्तिः स्त्री मङ्गले शमे'' इति मेदिनीकोशप्रामाण्यात् (होशिङ्गः। पृ.58)।

गात्रे मनसि च वेगोद्वेगराहित्यं शान्तिः इति सामान्यः अर्थः। इष्टस्य वस्तुनः अप्राप्तौ, अनिष्टस्य प्राप्तौ च उद्विजते मनः। ततः तत्तद्वस्तु प्रति रागद्वेषादयः उत्पद्यन्ते। तेन शान्तिः लुप्यते। प्रिययोगेण अप्रियापायेन च तुष्यति मनः, तदा शान्तिम् अनुभवन्ति जीवाः। तदुक्तं पद्मपुराणे–

**यत्किञ्चिद्वस्तु संप्राप्य स्वल्पं वा यदि वा बहु।**
**या तुष्टिर्जायते चित्ते शान्तिः सा गद्यते बुधैः॥** इति।

इदं व्यावहारिके जगति विश्वजनीनं निर्वचनम्। परमार्थस्तु भिन्नः। न जातु तोषणेन निवृत्तिः रागद्वेषादीनाम् इति स्थितिः। अत एव वेदान्तेषु विषयवस्तुभ्यः निवृत्तस्य मनसः स्वस्थता शान्तिः इतीरिता। तथाहि–

**विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः।**
**स्वलक्ष्ये नियतावस्था मनसः शम उच्यते॥** (माधवानन्दः, श्लो.22)

कलिकालसर्वज्ञेन हेमचन्द्राचार्येणापि तृष्णाक्षयः शान्तिः कीर्तिता।

साहित्यमर्मज्ञास्तु शमस्थायिभावकं निर्वेदव्यभिचारिभावकं शान्ताख्यरसविशेषनिष्ठं धर्मविशेषं शान्तिम् आहुः। तथा च साहित्यदर्पणे विश्वनाथः–

**शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः।**
**कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः॥**

(शास्त्री, कृष्णमोहनः,श्लो.245-246)

शान्तरसस्य शमः स्थायिभावः, उत्तमा प्रकृतिः, वर्णः कुन्दकुसुमवत् शुभ्रः, श्रीमन्नारायणश्च देवता इति तदर्थः। मौहूर्तिकास्तु पूजाहोमजपपारायणादिभिः इहलोके अनिष्टहेतु-पापनिवृत्तिं शान्तिं मन्वते। अतस्ते उदकशान्तिः, वास्तुशान्तिः, ग्रहशान्तिः इत्यादिरूपं शान्तिकर्म उपदिशन्ति (झळकीकीरः, पृ.873)। अत्र पत्रे सर्वेषाम् उपद्रवाणां तनुदशाम्, तन्नाशं वा शान्तिं मत्वा विषयः वितन्यते।

## 2. शान्तिपाठपरम्परा

### 2.1. को नाम शान्तिपाठः?

शान्तये अयं शान्त्यर्थः इति चतुर्थीतत्पुरुषसमासः। शान्त्यर्थः पाठः शान्तिपाठः इति शाकपार्थिवादिवत् कर्मधारयः। वेदमन्त्रेषु दुरितक्षयार्थम् उपद्रवोपशमार्थं च ये मन्त्राः अपठ्यन्त ते शान्तिमन्त्राः अभिहिताः। तेषां श्रद्धया उच्चारणम् एव शान्तिपाठः। तत्र चिताः दश मन्त्राः दश शान्तयः इति प्रथन्ते। अधः कोष्ठके ते समूलस्थाननिर्देशं प्रादर्शिषत।

**दश शान्तयः इति प्रसिद्धाः शान्तिमन्त्राः**

| क्र. शान्तिमन्त्राः | मूलस्थानम् | भाष्यादिकम् |
|---|---|---|
| 1. भद्रं कर्णेभिः शृणुयाम ...।। | तैत्तिरीयारण्यके 1.1.1 (फडके, भा.-1,पृ.2-3) | सायणभाष्यम् |
| 2. नमो ब्रह्मणे नमो...।। | तैत्तिरीयारण्यके 2.12.1 (पाठकः,भा.-1,पृ.179-180) | सायणभाष्यम् |
| 3. नमो वाचे या चोदिता...।। | तैत्तिरीयारण्यके 4.1.1-7 (पाठकः, भा.-1, पृ.321-327) | सायणभाष्यम् |
| 4. शं नो वातः पवतां...।। | तैत्तिरीयारण्यके 4.42.1-35 (पाठकः, भा.-1, पृ.486-500) | सायणभाष्यम् |
| 5. सं त्वा सिञ्चामि...।। | तैत्तिरीयारण्यके 1.6.1.1 (देशपाण्डे, भा.-2, पृ.658) | सायणभाष्यम् |
| 6. शं नो मित्रः शं...।। | तैत्तिरीयारण्यके 7.1.1-2 (पाठकः, भा.-2, पृ.715-716) | सायणभाष्यम् |
| | तैत्तिरीयारण्यके 1.1.1 (द्रविड, भा.-1, पृ.363-372) | शाङ्करभाष्यम् |
| 7. तच्छं योरावृणीमहे...।। | तैत्तिरीयारण्यके 1.9.20 (पाठकः, भा.-1, पृ.62) | सायणभाष्यम् |

| | | |
|---|---|---|
| 8. सह नाववतु...।। | तैत्तिरीयारण्यके 8.1.1 (पाठकः, भा.-2, पृ.775) | सायणभाष्यम् |
| | तैत्तिरीयोपनिषदि 2.2.1 (द्रविड, भा.-1, पृ.439) | शाङ्करभाष्यम् |
| 9. वाङ् मे मनसि...।। | ऋग्वेदीयः शान्तिमन्त्रः | श्रीमद्विद्यारण्यविरचिता ऐतरेयोपनिषद्दीपिका |
| 10. पूर्णमदः पूर्णमिदं...।। | बृहदारण्यकोपनिषदि 5.1.1 (द्रविड, भा.-3, पृ.390-391) | शाङ्करभाष्यम् |

उदाहरणार्थम् इमा दश शान्तयः कोष्ठके न्यदर्शिषत। विद्यन्ते अन्येऽपि शान्तिमन्त्राः वेदेषु प्रसिद्धाः। यथा–

(क) "यश्छन्दसामृषभो विश्वरूपः...।।" इत्यादिः तैत्तिरीयारण्यके 7.4.1-2 (पाठकः, भा.2, पृ.729-731)

(ख) "मधुवाता ऋतायते...।।" इत्यादिः तैत्तिरीयारण्यके 10.10.11-13 (पाठकः, भा.2, पृ.729-731)

(ग) "असतो मा सद्गमय...।।" इत्यादिः बृहदारण्यकोपनिषदि शाङ्करभाष्ययुतायाम् 1.3.28 (द्रविड, भा.3, पृ.52-53)[2]

(घ) "आप्यायन्तु ममाङ्गानि वाक्...।।" इत्यादिः (द्रविड, भा.2, पृ.433)।[3]

दश एव शान्तिमन्त्राः इति न मन्तव्यम्। सम्प्रदायभेदेन दश शान्तयः अपि भिद्यन्ते मन्त्रक्रमे सङ्ग्रहे च।[4] तद्यथा–केषाञ्चन मते अधोनिर्दिष्टाः दश शन्तिमन्त्राः ऊचिरे[5]–

1. शं नो मित्रः...।। 4. अहं वृक्षस्य रेरिवा...।। 7. वाङ्मे मनसि...।।

2. सह नाववतु।...।। 5. पूर्णमदः पूर्णमिदं...।। 8. भद्रं नो...।।

3. यश्छन्दसामृषभो...।। 6. आप्यायन्तु...।। 9. भद्रं कर्णेभिः...।।

10. यो ब्रह्माणं...।।

चतुर्दश शान्तिमन्त्राः इत्यपि कैश्चित् अवादि। अग्निपुराणे उत्पातशान्त्यध्याये अष्टादशानाम् उत्पातानां तन्निवारणमन्त्रादीनां च निर्देशः अकारि (शर्मा, राजेन्द्रः, पृ.178, अ.पु.26)। वेदशाखाभेदेन च मन्त्रः स्वरूपादिषु पार्थक्यमेति। यथा–ऋक्शाखिनां "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।" इति मन्त्रः (राडवाडे, भा–1,पृ.550)। याजुषाणां तु मध्ये विरामः–"भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।"

इति (फडके, भा.1,पृ.पृ.2.3)। स्वरभेदाश्च तत्र अवधेलिमाः। उपशाखाभेदेन पुनः भिद्यते पाठक्रमः। इत्थम् अनादिकालप्रवृत्ताया विपुलायाः शान्तिपाठपरम्परायाः ज्ञाने अनूचानपद्धतिः शरणम्।

## 2.2. शान्तिसूक्तानि

वेदेषु केचन मन्त्रसमूहाः दुरितनिवृत्त्यर्थम् अपाठिषत। यथा–उदकशान्तिमन्त्राः, अरिष्टनिवृत्तिमन्त्राः इत्यादयः। मञ्जुलानि शान्तिसूक्तानि च विलसन्ति यत्र प्रधानतया शान्तिः संप्रार्थ्यते। यथा–

(1) आनोभद्रास्सूक्तम् – ऋग्वेदसंहितायाम् 1.89.1-10 (राडवाडे, भा-1, पृ.546-552)

(2) स्वस्तिनोमिमीतांसूक्तम् – ऋग्वेदसंहितायाम् 5.51.11.-15 (राडवाडे, भा-2, पृ.886-888) (स्वस्त्ययनं तार्क्ष्यमरिष्टनेमि....इत्यतः खिलमन्त्रेषु 4.1,2, राडवाडे, भा-4, पृ.927)

(3) शंवतीसूक्तम्–ऋग्वेदसंहितायाम् 7.35.1-15 (राडवाडे, भा-3, पृ.358-362)

अघमर्षणसूक्तम् अपि प्रसिद्ध्यतितराम् (तैत्तिरीयारण्यके 10.1.71-85)।[6] पुनश्च माङ्गल्यमेदुरं शिवसङ्कल्पसूक्तं नितरां मनोज्ञम्।[7] शुक्लयजुर्वेदे वाजसनेयीसंहितायां षण्मन्त्रात्मकम् इदं सूक्तम् अपाठि।[8] ऋग्वेदे तु खिलाध्याये त्रयोदशर्चम् आम्नायि।[9] प्रतिमन्त्रम् अन्तिमचरणे ''तन्मे मनः शिवसङ्कल्पमस्तु'' इति श्रुतिसुखदं ध्रुवपदं पोपूयते[10] मनः। ज्ञानात्मनि भगवति वेदपुरुषे बोभूयन्ते शान्तिप्रार्थनारूपाः मन्त्राः। गुरुशिष्यपरम्परागताः इमे अधिजिगांसुभिः[11] आचार्यमुखात् शिक्ष्येरन्।

## 2.3 शान्तिमन्त्रप्रयोगः

दुरितक्षयद्वारा विघ्नोपशान्तिम् इष्टप्राप्तिं च इच्छद्भिः तत्त्वविद्भिः महर्षिभिः यथोचितं शान्तिपाठः तत्र तत्र कर्मसु व्यधायि। तद्यथा–

(1) ब्रह्मयज्ञस्य वेदाध्ययनस्य आदावन्ते च गुरुशिष्याः संगम्य शान्तिमन्त्रान् अपाठिषुः।[12]

(2) ब्रह्मतत्त्वम् उपदिदिक्षुभिः उपनिषन्महर्षिभिः उपक्रमे उपसंहारे च शान्तिमन्त्राः व्याजह्रिरे।

(3) यज्ञयागादिषु यथावसरम् ऋत्विजः शान्तिमन्त्रान् प्रायुजन्।

(4) व्रतादिषु दीक्षितैः यथानियतं शान्तिमन्त्राः अजपिषत।

एषां मन्त्राणां प्रयोगे फलनिरूपणे च प्रमाणं ब्राह्मणवाक्यानि, वेदाङ्गानि, तदनुसारीणि इतरशास्त्राणि, शिष्टरम्परा च। अग्निपुराणे अदर्शि–''स्वस्ति न इन्द्र इत्येतत्सर्वबाधाविनाशनम्।'' (शर्मा, राजेन्द्रः, पृ.175, अ.पु.260.32) ''शन्नो देवीरभिष्टये तथा शान्तिकरः परः।'' इत्यादि (शर्मा, राजेन्द्रः, पृ.174, अ.पु.259.93)। यजुर्विधाने च पुनः ''शिवसङ्कल्पजापेन समाधिं मनसो लभेत्'' इत्यवादि (शर्मा, राजेन्द्रः, पृ.176, अ.पु.260.74)। मनुना अपि ऊचे शिवसङ्कल्प–मन्त्रजपेन निर्मलो भवति इति (कश्यप, भा-2, पृ.672, मनु. 11.249)।

### 2.4. प्रत्युपनिषदं शान्तिमन्त्रः

प्रतिवदेशाखम् उपनिषदां कश्चन मन्त्रविशेषः शान्तिमन्त्रमेव आद्रियते। महावाक्यरत्नावल्याम् उपनिषच्छान्तिपाठक्रमः इत्थम् अदर्शि **''वाक्पूर्णसहनाप्यायन्भद्रंकर्णेभिरेव च। पञ्च शान्तीः पठित्वादौ पठेद्वाक्यान्यनन्तरम्॥''** इति। शुक्लयजुर्वेदस्य मुक्तिकोपनिषदि[13] अष्टोत्तरशतम् उपनिषदः नामग्राहं निरदिश्यन्त। चतुर्षु स्थितानाम् उपनिषदां शान्तिमन्त्राश्च तत्र ऊचिरे। तथाहि–

#### 2.4.1. ऋग्वेदगतानां दशसंख्याकानाम् उपनिषदां वाङ्मे मनसीति शान्तिः।[14] ( 10 )

1. एतरेयोपनिषत् 2. कौषीतक्युपनिषत् 3. नादविन्दूपनिषत् 4. आत्मप्रबोधोपनिषत् (आत्मबिन्दूपनिषत्)
5. निर्वाणोपनिषत् 6. मुद्गलोपनिषत् 7. अक्षमालिकोपनिषत् 8. त्रिपुरोपनिषत्
9. सौभाग्योपनिषत् 10. बह्वृचोपनिषत्

#### 2.4.2. ''शुक्लयजुर्वेदगतानाम् एकोनविंशतिसंख्याकानाम् उपनिषदां पूर्णमदः इति शान्तिः'' ( 19 )

| | | |
|---|---|---|
| 1. ईशावास्योपनिषत् | 2. बृहदारण्यकोपनिषत् | 3. जाबालोपनिषत् |
| 4. हंसोपनिषत् | 5. परमहंसोपनिषत् | 6. सुबालोपनिषत् |
| 7. मन्त्रिकोपनिषत् | 8. निरालम्बोपनिषत् | 9. त्रिशिखीब्राह्मणोपनिषत् |
| 10. मण्डलब्राह्मणोपनिषत् | 11. अद्वयतारकोपनिषत् | 12. पैङ्गलोपनिषत् |
| 13. भिक्षूपनिषत् | 14. तुरीयातीतोपनिषत् | 15. अध्यात्मोपनिषत् |
| 16. तारसारोपनिषत् | 17. याज्ञवल्क्योपनिषत् | 18. शाट्यायन्युपनिषत् |
| 19. मुक्तिकोपनिषत् | | |

**2.4.3. ''कृष्णयजुर्वेदगतानां द्वात्रिंशत्संख्याकानाम् उपनिषदां सहनाववत्विति शान्तिः'' ( 32 )**

| | | |
|---|---|---|
| 1. कठवल्ल्युपनिषत् (कठोपनिषत्) | 2. तैत्तिरीयोपनिषत् (तित्तिर्युपनिषत्) | 3. ब्रह्मोपनिषत् |
| 4. कैवल्योपनिषत् | 5. श्वेताश्वतरोपनिषत् | 6. गर्भोपनिषत् |
| 7. नारायणोपनिषत् | 8. अमृतबिन्दूपनिषत् | 9. अमृतनादोपनिषत् |
| 10. कालाग्निरुद्रोपनिषत् | 11. क्षुरिकोपनिषत् | 12. सर्वसारोपनिषत् |
| 13. शुक्ररहस्योपनिषत् | 14. तेजोबिन्दूपनिषत् | 15. ध्यानबिन्दूपनिषत् |
| 16. ब्रह्मविद्योपनिषत् | 17. योगतत्त्वोपनिषत् | 18. दक्षिणामूर्त्युपनिषत् |
| 19. स्कन्दोपनिषत् | 20. शारीरकोपनिषत् | 21. योगशिखोपनिषत् |
| 22. एकाक्षरोपनिषत् | 23. अक्ष्युपनिषत् | 24. अवधूतोपनिषत् |
| 25. कठोपनिषत् (कठरुद्रोपनिषत्) | 26. रुद्रहृदयोपनिषत् | 27. योगकुण्डलिन्युपनिषत् |
| 28. पञ्चब्रह्मोपनिषत् | 29. प्राणाग्निहोत्रोपनिषत् | 30. वाराहोपनिषत् |
| 31. कालिसन्तरणोपनिषत् (कलिसन्तारणो...) | 32. सरस्वतीरहस्योपनिषत् | |

**2.4.4. ''सामवेदगतानां षोडशसंख्याकानाम् उपनिषदाम् आप्यायन्त्विति शान्तिः'' ( 16 )**

| | | |
|---|---|---|
| 1. केनोपनिषत् | 2. छान्दोग्योपनिषत् | 3. आरुण्युपनिषत् |
| 4. मैत्रायण्युपनिषत् | 5. मैत्रेय्युपनिषत् | 6. वज्रसूचिकोपनिषत् |
| 7.योगचूडामण्युपनिषत् | 8. वासुदेवोपनिषत् | 9. महत्संन्यासोपनिषत् |
| 10. अव्यक्तोपनिषत् | 11. कुणडिकोपनिषत् | 12. सावित्र्युपनिषत् |
| 13. रुद्राक्षोपनिषत् | 14. जाबालोपनिषत् | 15. दर्शनोपनिषत् |
| 16. जाबाल्युपनिषत् | | |

**2.4.5. ''अथर्ववेदगतानाम् एकत्रिंशत्संख्याकानाम् उपनिषदां भद्रं कर्णेभिरिति शान्तिः'' ( 31 )**

| | | |
|---|---|---|
| 1. प्रश्नोपनिषत् | 2. मुण्डकोपनिषत् | 3. माण्डूक्योपनिषत् |

| | | |
|---|---|---|
| 4. अथर्वशिर उपनिषत् | 5. अथर्वशिखोपनिषत् | 6. बृहज्जाबालोपनिषत् |
| 7. नृसिंहतापन्युपनिषत् | 8. नारदपरिव्राजकोपनिषत् | 9. सीतोपनिषत् |
| 10. शरभोपनिषत् | 11. महानारायणोपनिषत् | 12. रामरहस्योपनिषत् |
| 13. रामतापन्युपनिषत् | 14. शाण्डिल्योपनिषत् | 15. परमहंस-परिव्राजको. |
| 16. अन्नपूर्णोपनिषत् | 17. सूर्योपनिषत् | 18. आत्मोपनिषत् |
| 19. पाशुपतोपनिषत् | 20. परब्रह्मोपनिषत् | 21. त्रिपुरारातपनोपनिषत् |
| 22. देव्युपनिषत् | 23. भावनोपनिषत् | 24. ब्रह्मजाबालोपनिषत् |
| 25. गणपत्युपनिषत् | 26. महावाक्योपनिषत् | 27. गोपालतपनोपनिषत् |
| 28. कृष्णोपनिषत् | 29. हयग्रीवोपनिषत् | 30. दत्तात्रेयोपनिषत् |
| 31. गारुडोपनिषत् (गरुडो...) | | |

एवं शास्त्रेषु शान्तिपाठक्रमः तत्र तत्र निरूपितः।[15] ज्ञानिभिः प्रवर्तितां तां पद्धतिम् अनुसृत्य अद्यापि श्रद्धालुभिः वैदिककर्मसु मङ्गलकार्येषु च शान्तिमन्त्राः प्रपठ्यन्ते। शान्ति-मन्त्रपाठस्य अन्त्ये ओङ्कारपुरःसरं त्रिवारं शान्तिशब्दोच्चारणम् अपि शान्तिपाठः एव। अयं शान्तिपाठः मन्त्रान्तराणाम् अन्तेऽपि क्रियते यथासम्प्रदायम्। तद्यथा वेदघोषावसरे प्रतिसूक्तम् अवसाने–"ओं शान्तिः शान्तिः शान्तिः" इति पठ्यते।

## 2.5. त्रिः शान्त्युच्चारणस्य किं तात्पर्यम्?

दुरितनिवृत्तिद्वारा दुःखनिवारणं शान्तिपाठस्य फलम्। तत्र त्रिः शान्तिः कुतः इति चेदुच्यते। **त्रिविधदुःखनिवारणार्थं त्रिवारं शान्त्युच्चारणम्।** आदौ ओम् इति किम्? **ओङ्कारः भगवद्वाची।** प्रणवः ईश्वरस्य वाचकः, तदनुस्मरणं विघ्ननाशकम् इति उपादेशि योगशास्त्रेषु (मुखर्जी। पृ.36,यो.सू.1.27)। "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति स्मृतेश्च (गीता। भा.2,पृ.835।17.23)। ओम् इत्युच्चारणेन सर्वरक्षकः भगवान् संस्मर्यते आमन्त्र्यते च। ओम् इति शब्दः रक्षणार्थः। रक्षणार्थाद् अव–धातोः "अवतेष्टिलोपश्च" (शर्मा, गिरिधर। भा-4, पृ.174)। इति औणादिके मन्–प्रत्यये ओम् इति निष्पन्नम्। ओम् इति अव्ययपदम्।[16] "ओं शान्तिः शान्तिः शान्तिः।" इत्यस्य "हे सर्वरक्षक भगवन् दुःखं सर्वविधम् अपाकुरु, सर्वथा शान्तिम् अनुगृहाण" इत्याकूतम्। समस्तं दुःखजातं महर्षिभिः त्रिधा व्यभाजि[17] इत्युक्तम्। ते त्रयः प्रकाराः तावत्–**आध्यात्मिकं दुःखम् आधिभौतिकं दुःखम् आधिदैविकं दुःखं चेति।** त्रिविधं दुःखम् उद्दिश्य त्रिः शान्तिपाठः।

# 3. दुःखत्रयम्

## 3.1 किं नाम दुःखत्रयम्

दुःख्यते इति दुःखम्। भावे व्युत्पन्नोऽयं शब्दः प्रतिकूलसंवेदनं वक्ति। दुःख तत्क्रियायाम् इति चुरादिगणीयात् सकर्मकात् सेटः धातोः उभयपदिनः, ''भयादीनामुपसङ्ख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्'' (शर्मा, गिरिधरः। भा-4, पृ.324) इति वार्त्तिकेन भावे अच्। दुःखनिमित्तम् अपि दुःखम्। तत्र दुःखयति इति कर्तरि व्युत्पत्तिः। ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' (3.1.134/2896/4.34) इति सूत्रेण कर्तरि अच्। त्रयाणां समूहः त्रयम्। त्रयः अवयवाः अस्य इत्यर्थे त्रिशब्दात् ''द्वित्रिभ्यां तयस्यायज्वा'' 5.2.43/1844) इति सूत्रेण अयच् –प्रत्यये त्रयम् इति रूपम्। दुःखानां त्रयम् दुःखत्रयम् इति षष्ठीतत्पुरुषसमासः। अत्र च सामर्थ्यापेक्षिणः तद्धितप्रत्ययस्य उत्पादार्थं मुनित्रयवत् पार्ष्ठिकान्वयः द्रष्टव्यः (शर्मा, गिरिधरः भा-1, पृ.3)। तापत्रयम् बाधात्रयम्, दुःखत्रयम् इत्यर्थान्तरम्। शरीरे मनसि च भवं दुःखम् आध्यात्मिकम्, अन्यभूतेभ्यः उद्भूतम् आधिभौतिकम्, दिवः जातम् आधिदैविकम् उच्यते।

## 3.2. आध्यात्मिकं दुःखम्

आध्यात्मिकं दुःखं द्विप्रकारम्–आधिः व्याधिश्च। आधिः मानसः, व्याधिः शारीरः। रोगादयः शरीरं बाबाध्यन्ते। वातः पित्तं कफः इति त्रयः धातवः शरीरं धरन्ति। तेषां वैषम्यं रोगकारणम्, साम्यं स्वास्थ्यनिदानम्। वैद्यकीयशास्त्रेभ्यः रोगनिदानं दोषसमीकरणं चिकित्सा इत्यादिकं विज्ञेयम्। मानसदुःखस्य कारणं काम–क्रोध–लोभ–मोह–मद–मत्सरादयः। तेषां समाधानं योगशास्त्रादिषु प्रोक्तम्। गौडपादस्तु आयुर्वेदेनैव द्विप्रकारस्य आध्यात्मिकस्य निवारणं प्रोवाच (षडङ्गी। पृ.7. का.1)। योगशास्त्रेषु यथा–''मैत्री-करुणामुदिततोपेक्षाणां भावनातश्चित्तप्रसादनम्'' (मुखर्जी। पृ.77, यो.सू. 1.33), ''वितर्कबाधने प्रतिपक्षभावनम्'' (मुखर्जी। पृ.215, यो.सू.2.33) इत्यादिसूत्रैः चित्तक्षोभस्य परिहारः उपादेशि भगवता पतञ्जलिना। दैहिकं मानसिकं च कृच्छ्रम् अन्तःस्थितेन निमित्तेन उद्भवति। आत्मनि स्थितेन आन्तरिकेण उपायेन जायते, आन्तरिकेणैव उपायेन प्रशाम्यति च इत्यतः आध्यात्मिकम् इति अभिधा। यद्यपि औषधादयः प्रयुज्यन्ते तथापि तैः अन्तः स्थितः दोषः समीक्रियते ततः दुःखनिवृत्तिः इति क्रमः। अतः समस्यायाः परिहारस्य उभयोः आन्तरिकत्वात् आध्यात्मिकम् इति नाम सङ्गच्छते।

## 3.3 आधिभौतिकं दुःखम्

यद् दुःखम् भूतेभ्यः जायते तद् आधिभौतिकम्। चतुर्विधानि भूतजातानि – जरायुजानि

अण्डजानि स्वेदजानि उद्भिज्जानि च। तत्र मनुष्याः पशवः मृगाः इत्यादयः जरायुजाः भूतविशेषाः। पक्षिणः सरीसृपाः मत्स्याः मकराः इत्यादयः अण्डजाः। दंशाः मशकाः यूकाः मत्कुणाः इत्यादयः स्वेदजाः। ओषधिवनस्पतयः उद्भिज्जाः स्थावराः। एभ्यः चतुर्विधेभ्यः भूतेभ्यः यद् दुःखम् उपजायते तद् आधिभौतिकं उच्यते। मानुषस्य सामदान-भेददण्डोपायेन प्रतिघातः। पशुपक्षिमृगकीटादिजन्यस्य यथोचितरक्षणादिना विषवैद्यादिना वा अभिघातः। अत्र केचन यक्षराक्षसविनायकग्रहावेशादिजन्यम् अपि आधिभौतिकं मन्वते। अन्ये (वाचस्वतिमिश्रादयः) तु यक्षराक्षसादिभ्यः जातम् आधिदैविकं वदन्ति। यक्षराक्षसादयः अपि भूतसर्गविशेषाः इत्युक्तं साङ्ख्यदर्शने। अतः तेषाम् आधिभौतिकत्वाभ्युपगमोऽपि न अप्रामाणिकः इत्यलं विस्तरेण (षडङ्गी। पृ.169, का.53)।

### 3.4. आधिदैविकं दुःखम्

दिवः उत्पन्नम् आधिदैविकं दुःखम्। देवताम् अधिकृत्य प्रवृत्तम् अपि आधिदैविकम् उच्यते। अतिवृष्टिः, अनावृष्टिः, वज्रपातः, उल्कापातः इत्यादयः उपद्रवाः आधिदैविकाः। ते हि दिवः प्रभवन्ति। अत्र दिव् इत्येतद् उपलक्षणम्। बाह्यप्रकृतेः ये उत्पाताः अतिपतन्ति ते सर्वेऽपि आधिदैविका विज्ञेयाः। अतिवातः, झञ्झा, भूकम्पः, नदीसागरादिषु उत्प्लावः, पर्वताग्निः इत्यादयः अपि आधिदैविकाः तापाः। तेषां समाधौ याग–यज्ञ–होम–हवनादयः उपायाः। तथाहि–"**हविरावर्जितं होतस्त्वया विधिवदग्निषु। वृष्टिर्भवति सस्यानामव-ग्रहविशोषिणाम्॥**" इति ब्रुवता भगवता च इदं प्रमाणीकृतम् (गीता। भा-1, पृ.167, 3.10)। आत्मनः बहिः दिवि भवाः इमे आधिदैविकाः प्रोक्ताः। अद्यत्वे अभियन्त्रकौशलेन विज्ञाननैपुणेन च एषां प्रतिविधानं क्रियते। तथापि बाह्योपायजन्यत्वं बाह्योपायनाश्यत्वं च अव्यभिचरितम् एषाम्।

### 4. उपसंहारः

त्रिविधतापैः पीड्यमानस्य न विद्यते शान्तिवार्ताऽपि। सर्वतोभावेन दुःखत्रयं प्रतिविधेयं विवेकिना। स च प्रतिघातोपायः वेदशास्त्रेभ्यः आचार्योपदेशात् उपलम्भनीयः।[18] शान्ति-पाठोऽपि महर्षिभिः अन्यतमोपायत्वेन उपदिष्टः। तापत्रयस्य प्रतिविधानं भगवत्प्रार्थनापुरः-सरं स्यात् इति मनीषिणां मतिः। आधिदैविकं दुःखम् ईश्वरस्य संजिहीर्षया उपजायते। तत्र मानुषकौशलम् अकिञ्चित्करम्। अत एव ज्ञानिनः महर्षयः स्तुतिरूपात् शान्तिप्रार्थनारूपान् च मन्त्रान् उपदिदिशुः। अपि पाठमात्रेण उपद्रवोशमः संभाव्यते? इति चेत्। सत्यम् पाठमात्रेण उत्पातानाम् उत्पाटनम् असम्भवं सामान्यजनानां विषये। महात्मनां तु न विद्यते किञ्चिदशक्यम्। सामान्यैः प्रतीकारोपायः आस्थेयः। स च शान्तिपाठसुरःसरं

कार्यः इति गुरुजनानाम् आशयः। न च प्रतीकारेणैव कार्यसिद्धौ शान्तिपाठेन किम् इति वाच्यम्। "**प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः**" (1.1.17) इति न्यायदर्शनोक्तेः। प्रयत्नेन जन्या क्रिया प्रवृत्तिः। सा त्रिधा – कायिकी, वाचिकी, मानसिकी च। त्रिभिः सम्पन्नः आरम्भः वीर्यवान् स्यात्। एकेनाऽपि ऊनः बलहीनो भवेत् उद्यमः। अतः शान्तिपाठोऽपि पुरुषकारस्य अविभाज्यम् अङ्गम्। एकाग्रेण मनसा विहितं शान्तिशंसनं फलसमर्थम् इत्यत्र आस्तिकाः श्रद्धालवः प्रमाणं ये अभिमन्त्रणेन अभ्युदयनिःश्रेयसमार्गं सुगमयन्ति। अयं तु शिष्टानुशिष्टानां लौकिकानां साधूनां क्रमः। महात्मनां पुनः पन्थानः भिन्नाः। केवलेनाऽपि शान्तिपाठेन दुःखापनये समर्था हि ते। तथाहि–"**सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्**" इत्युक्तं योगदर्शने। भवभूतिनाऽपि उत्तररामचरिते सुष्ठु कीर्तितम्– "**ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति**" इति (रेग्मीः। पृ.2,1.10)। त एव महात्मानः शान्तिपाठपद्धतिं प्रवर्तयामासुः लोककल्याणाय। प्रेक्षावता तस्मात् न जातु शान्तिपाठे प्रमादः कार्यः। पदनीया अनिशं शान्तिपद्या या तत्त्वज्ञैरनुसेविता। सर्वे शान्तिकामा अतः संभूय सदा शान्तिमन्त्रं संपठन्तु–

"पृथिवी शान्ता साग्निना शान्ता सा मे शान्ता शुचः॑ शमयतु। अन्तिरिक्षः॑ शान्तं तद्वायुना शान्तं तन्मे शान्तः॑ शुचः॑ शमयतु। द्यौः शान्ता सादित्येन शान्ता सा मे शान्ता शुचः॑ शमयतु।

पृथिवी शान्तिरन्तरिक्षः॑ शान्तिर् द्यौः शान्तिर्दिशः शान्तिरवान्तरदिशाः शान्तिरग्निः शान्तिर् वायुः शान्तिरादित्यः शान्तिश् चन्द्रमाः शान्तिर् नक्षत्राणि शान्तिरापः शान्तिरोषधयः शान्तिर् वनस्पतयः शान्तिर् गौः शान्तिरजाः शान्तिरश्वः शान्तिः पुरुषः शान्तिर् ब्रह्म शान्तिर् ब्राह्मणः शान्तिः शान्तिरेव शान्तिः शान्तिर् मे अस्तु शान्तिः।

तयाहः॑ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः।।"[१९]

*॥ ओं शान्तिः शान्तिः शान्तिः॥*

**सन्दर्भाः–**

1. "अग्रे अत्रिवन् मनसा..." इत्यादिमन्त्रः ऋग्वेदसंहितायाम् अपि अपाठि, सायणेन च व्याख्यायि। विद्यते तत्र पाठभेदः तन्निबन्धनः अर्थभेदश्च (राडवाडे, भा.2, पृ.737, ऋ.सं.5.4.9)।
2. वाजसनेयीमाध्यन्दिने शतपथब्राह्मणे अस्य मन्त्रस्य श्रीवासुदेव–ब्रह्मभगवतः वासुदेव-प्रकाशिकाख्या बृहदारण्यकटीका अपि प्राप्यते। (शतपथब्राह्मणम्, भा.5, पृ.14)
3. नाऽस्य मन्त्रस्य मूलस्थानं सम्प्रति उपलभ्यते। विलुप्तेषु वेदशाखासु क्वापि स्यात् इति भाति। अयं मन्त्रः सामवेदीयानाम् उपनिषदाम् आदौ ग्रन्थेषु मुद्र्यते। पारस्करगृह्यसूत्रेषु एततुल्यः कश्चन मन्त्रः अपाठि यत्र अन्ते... "आप्यायन्तु मेङ्गानि वाक्प्राणश्चक्षुः श्रोत्रे यशो बलम्।। यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु, तिष्ठतु।।" इति पठितम् (पारस्कर, 3.16.1)।
4. कोष्टके दर्शितं तु दक्षिणापथे कृष्णयजुर्वेदीय–तैत्तिरीय–शाखाध्यायिनाम् एकदेशिनाम् अयं परम्परानुगुण्येन।
5. पणशीकरोपाह्वेन वासुदेवशर्मणा संस्कृत्य सम्पादिते "ईशाद्यष्टोत्तरशतोपनिषदः" ग्रन्थे द्रष्टव्यम्। (पणशीकरः, पृ.2-3)
6. द्रष्टव्यम् (पाठकः, भा.2, पृ.1106-1104)
7. खिलानुक्रमध्यादिग्रन्थाः "शिवसङ्कल्पसूक्तम्" इति नामकरणे प्रमाणम्।
8. वाजसनेयीसंहितायाम् कण्व–माध्यन्दिनशाखयोः उभयोः अपि अयं मन्त्रः आम्नायि। द्रष्टव्यम् (वेबर, पृ.103-104, 34.1-6)
9. द्रष्टव्यम् (राडवाडे, भा.4 पृ.970-971, खिलाध्यायः 4.11.1-13)
10. पूञ् पवने इति क्रयादिगणीयस्य सकर्मकः सेटः उभयपदिनः यङन्तम्।
11. नित्यम् अधिपूर्वस्य इङ् अध्ययने इत्यस्य आदादिकस्य सकर्मकस्य अनिटः आत्मनेपदिनः धातोः सनि रूपम्।
12. पठ् व्यक्तायां वाचि इत्यस्य लुङ्लकारः अयम्। "अतो हलादेर्लघोः" (7.2.2284) इति हलादेर्लघोः अकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात् इत्यतः अपठीत् अपाठीत् इति रूपद्वयम्।
13. स्वयं मुक्तिकोपनिषत् अत्र प्रमाणम्। तत्र हि शुक्लयजुःशाखोपनिषत्सु अन्यतमत्वेन अपाठि। तथाहि–"...याज्ञवल्क्य–शाट्यायनी–मुक्तिकानां...।।" इति। (पणशीकरः,पृ.558)
14. अयं वाक्यभागः मुक्तिकोपनिषदः उदाहारि (पणशीकरः, पृ.558) एवमग्रेऽपि द्रष्टव्यम्।

15. उपरिष्टाद् उपनिषदां नाम्नां रूपान्तराणि तत्तदुपनिषदः नीचैः आवरणयोः अदर्शिषत। विविधशास्त्रेषु व्याख्यानादिषु च यानि नामान्तराणि दृश्यन्ते उपनिषदां तदनुसारेण नाम्नि पाठभेदाः समग्राहिषत। निदर्शनमुद्रया अत्र कतिपयानि अतीव प्रसिद्धानि एव अदायि। पणशीकरमहोदयेन सम्पादितं पुस्तकम् अनुसृत्य अत्र 108 उपनिषदाम् आवलिः। कृष्णयजुर्वेदीयासु कठ इति द्वितीयवारं पठितम्। अन्येषु संस्करणेषु इयं कठरुद्रोपनिषत् इति अदर्शि। मुक्तिकोपनिषदः मूलपाठे तु कठवल्ली इति आदौ प्रदाय पुनः ''योगशाखैकाक्षराक्ष्यवधूतकठरुद्रहृदयोगकुण्डलिनी...'' इति अपाठि। अत्र कठरुद्र इति स्वीकृते अनन्तरवर्तिनी हृदयोपनिषत् इति स्यात्। न च तन्नाम्ना काचित् उपनिषत् प्रसिद्ध्यति उपलभ्यमानेषु संस्करणेषु। अतः देहलीदीपन्यायेन उभयत्रान्वयि रुद्रशब्दः इति भाति। पारम्परिकाः विद्वांसः अत्र प्रमाणम्।

16. अव रक्षण–गति–कान्ति–प्रीति–तृप्त्यवगम–प्रवेश–श्रवण–स्वाम्यर्थ–याचन–क्रियेच्छा–दीप्त्यवाप्त्यालिङ्गन–हिंसादान–भाग–वृद्धिषु इत्यस्मात् सकर्मकात् सेटः परस्मैपदिनः धातोः इयं व्युत्पत्तिः। गोपथब्राह्मणे आप्नोतेः अपि ओङ्कारस्य उत्पत्तिः दर्शिता। सर्वव्यापी परमात्मा इति तदर्थः। तत्रैव ओङ्कारस्य अव्ययत्वम् अपि उक्तम् (देवी, पृ.44, गो.ब्रा.1.26)।

17. ''भञ्जेश्च चिणि'' (6.4.33/2764) इति विकल्पेन नलोपे, ''अत उपधायाः'' (7.2.116/2282) इति उपधावृद्धौ, ''चिणो लुक्'' (6.4.104/2329) इति तिङ्लोपे च रूपम्।

18. ''लभेश्च'' (7.1.64/2582) इति नुमागमः। ''उपसर्गात् खल्घञोः'' (7.1.67/3306) इत्यनेन खल्घञोश्चेत् उपसर्गादेव लभेर्नुम् इति नियम्यते, न तु वैपरीत्येण उपसर्गाच्चेत् खल्घञोरेवेति। ''गृधिवञ्च्योः प्रलम्भने'' (1.3.69/2739) इत्याचार्यप्रवृत्तिः अत्र ज्ञापकम्।

19. कृष्णयजुर्वेदस्य तैत्तिरीयारण्यके 4 प्रपाठके, 42 अनुवाके अयं मन्त्रः।

***

## किञ्चिद् रामायणीयम्

*** श्रीरामम् अयोध्यां पुनरानेतुं भरतेन सह एते अयोध्यातः गताः आसन्, अर्थात् एतादृशीः विविधाः जीवनवृत्तीः धारयन्त्यः प्रजाः तदानीम् अयोध्यायाम् आसन्–**

(1) मणिकाराः, (2) कुम्भकाराः, (3) सूत्रकर्मविशेषज्ञाः, (4) शस्त्रोपजीविनः, (5) मायूरकाः, (6) क्राकचिकाः, (7) वेधकाः, (8) रोचकाः, (9) दन्तकाराः, (10) सुधाकाराः, (11) गन्धोपजीविनः, (12) सुवर्णकाराः, (13) कम्बलकारकाः, (14) स्नापकोष्णोदकाः, (15) धूपकाः, (16) शौण्डिकाः, (17) रजकाः, (18) तुन्नवायाः, (19) ग्रामघोषमहत्तराः, (20) शैलूषाः (स्त्रीभिः सह), (21) कैवर्तकाः, (22) वेदविदः ब्राह्मणाः।

**अयोध्याकाण्डम्** 83/12-16

*** चित्रकूटे भरतस्य प्राप्तेः अनन्तरं सुहृद्भिः वृताः रामलक्ष्मणभरताः एतादृशाः आसन्–**

यथा–अध्वरे सदस्यैः सहिताः त्रयः अग्नयः (गार्हपत्य–आहवनीय–दक्षिणाः)
तथा सुहृद्भिः वृताः अग्नित्रयतुल्याः श्रीरामः लक्ष्मणः भरतश्च आसन्।

**स राघवः सत्यधृतिश्च लक्ष्मणो**
**महानुभावो भरतश्च धार्मिकः।**
**वृताः सुहृद्भिश्च विरेजिरेऽध्वरे**
**यथा सदस्यैः सहितास्त्रयोऽग्नयः॥**

**अयोध्याकाण्डम्** 104/32

<table>
<tr><td colspan="3">सुहृदः सदस्याः इव</td></tr>
<tr><td>सुहृदः<br>सदस्याः<br>इव</td><td>1. सत्यधृतिः राघवः<br>अग्निः इव<br>2. महानुभावः लक्ष्मणः<br>अग्निः इव<br>3. धार्मिकः भरतः<br>अग्निः इव</td><td>सुहृदः<br>सदस्याः<br>इव</td></tr>
<tr><td colspan="3">सुहृदः सदस्याः इव</td></tr>
</table>

–संकलकः सम्पादकः

# कार्तवीर्योदयमहाकाव्ये शब्दशास्त्रीयदर्शनसम्बद्धाः विषयाः

**डा. तेजनाथपौडेलः**

यद्यप्याकरग्रन्थेषु दर्शनपदप्रवृत्तिनिमित्तमधिकृत्य शास्त्रीयपद्धत्या क्वचन कश्चन विचारो नावलोक्यते तथापि यत्र मोक्षस्वरूपं मोक्षोपायः, आत्मस्वरूपम्, आत्मातिरिक्तस्य निखिलस्य जगतः स्वरूपं तत्साधकानि प्रमाणानि, इत्याद्याध्यात्मिकविषयाः प्रसङ्गोपात्तलौकिकविषय-चर्चापि यत्र वर्तते तदेव दर्शनपदव्यवहार्यमिति दृश्यते। संस्कृतवाङ्मयस्याध्ययनेन ज्ञायते यदाचार्यैः कृतः शास्त्रदर्शनयोर्व्यवहारः वेदनिरपेक्षेषु जैनबौद्धादिग्रन्थेषु वेदसापेक्षेषु प्रत्यभिज्ञा-दिवैविध्येषु वेदान्तादिग्रन्थेषु संगच्छते। तद्यथा–

**शासनात् शंसनाच्छास्त्रं शास्त्रमित्यभधीयते॥**
**शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवेदिभिः।**
**शंसनं भूतवस्त्वेकविषयं तु क्रियापरम्॥**
**यदाभ्युदयिकं चैव नैःश्रेयसिकमेव च।**
**सुखं साधयितुं मार्गं दर्शयेत् तद्धि दर्शनम्॥**

शब्दशास्त्रविषयकैरेभिर्वचनैः व्याकरणशास्त्रमपि दर्शनत्वमङ्गीकर्तुं शक्यते। यद्यपि सर्वसिद्धान्तसंग्रहे भगवता शंकराचार्येण, षड्दर्शनसमुच्चये जिनदत्ताचार्येण चास्तिकनास्तिक-दर्शनविचारप्रसङ्गे व्याकरणस्य चर्चा नोद्भाविता तथापि सर्वप्रथमं दार्शनिकानां मध्ये सर्वतन्त्रस्वतन्त्रेण महादार्शनिकेन श्रीमाधवाचार्येण सर्वदर्शनसंग्रहे[1] व्याकरणस्य दार्शनिकतया विचारं विधाय व्याकरणशास्त्रस्य दर्शनत्वं कण्ठरवेणोद्धाटितम्। तथा च ''**प्रथमचरम-तयाल्पार्द्धकतिपयनेमाश्च**''[2] इति सूत्रे ''**सर्ववेदपारिषदमिदं शास्त्रम्**''[3] इति कथयता महाभाष्यकारेणाप्येतस्य शास्त्रत्वं बोधितम्। व्याकरणस्य दर्शनत्वमितोऽपि स्पष्टतया भासते यदन्ये दार्शनिका आस्तिकाः नास्तिकाश्चेति स्वस्वग्रन्थे पक्षविपक्षस्थले वैयाकरणमतमुपादाय खण्डनमण्डनपरतावलोक्यते, तत्खण्डनमण्डनपरत्वञ्च सजातीये संभवति नान्यत्र।

**प्रवृत्तिनिवृत्तिपराणां च सन्दर्भाणां शास्त्रत्वम्।**

इतिवचनानुसारं यथान्यानि धर्मशास्त्राणि, दर्शनादीनि च विधिनिषेधाभ्यां सुकृतदुष्कृत-कृत्येषु प्रवृत्तिनिवृत्तिं कुर्वन्ति तथैवेदं व्याकरणमपि असाधुशब्देभ्यो निवृत्तिं प्रकृतिप्रत्ययतदर्थपूर्वकपरिनिष्ठितसाधुशब्देषु प्रवृत्तिञ्च करोति। अतोऽसाधुशब्देभ्यो विविच्य साधुशब्दानां ज्ञापकत्वादस्य व्याकरणस्य शास्त्रत्वं दर्शनत्वञ्च सिद्ध्यति। वैयाकरणाः शास्त्रतः प्रकृतिप्रत्ययविभागेन साधून् शब्दान् ज्ञात्वा वाचं पदशः प्रकृतिप्रत्ययविभागेन विवृत्य वाचोऽर्थान् सम्यक् पश्यन्तः शास्त्रार्थध्यानवन्तः मानसज्ञानेन वाचमसाधुशब्देभ्यः पृथक्कृतवन्तः तज्ज्ञानपूर्वकसाधुशब्दप्रयोगैर्लब्धान्तःकरणशुद्धयो भवन्ति। ततश्चित्तशुद्धिक्रमेण विषयान्तरेभ्यो व्यापृताः वशीकृतचित्ताः व्याकरणशास्त्रबलेन तदवाप्तयोगेन हृदयान्धकारं विदार्य आत्मना अन्तःस्थेन शब्दब्रह्मणा अभेदमापादयन्ति। एवं दृष्टे शब्दब्रह्मणि लौकिकाधिकारविनिवृत्तौ त्यक्तभेदभावनाः सायुज्यं प्राप्नुवते। शाब्दिकनये स्फोट एवार्थवाचकः स च स्फोटो व्याकरणशास्त्रसाध्यप्रयोगव्यङ्ग्यो ध्वनिरूपात्मकवैखरीरूपरूषितो ब्रह्मानतिरेकः। एवं वैयाकरणानां भिन्नभिन्नवैखरीरूपोपाधिभिन्नब्रह्मण एवार्थबोधकत्वेन सर्वबोधकेषु ब्रह्म-बुद्धौ जातायामर्थस्य च शब्दब्रह्मणो विवर्ततया सर्वपदार्थेषु च ब्रह्मबुद्धिर्भवति। यथोक्तं भर्तृहरिणा–

**तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।।**[4]

अतः चतुर्विधेषु सालोक्यसामीप्यसारूप्यसायुज्याख्येषु चतुर्विधेषु मोक्षेषु सायुज्यमोक्ष एव शाब्दिकाभिप्रेतः। तमेव लभन्ते वैयाकरणाः। यथोक्तं भर्तृहरिणा पुनरपि–

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।**[5]

विषयेऽस्मिन् नागेशोऽप्येवं वक्ति भाष्योद्द्योते–

**''महान् परब्रह्मरूपो देवोऽन्तर्यामिरूपः शब्दो मर्त्येष्वाविष्ट इत्यर्थः। तदेव फलमाह—महता देवेनेति। साम्यं सायुज्यम्''**[6]

एतादृशः परममहिममण्डितस्य सकलशास्त्रेषु व्यापकप्रभावयुक्तस्य व्याकरणदर्शन-शास्त्रस्य साहित्यशास्त्रेऽपि प्रभावः स्वाभाविकमेव साहित्यशास्त्रस्य विशेषतः काव्यग्रन्थेषु भक्तिशान्तादिरसवर्णनप्रसङ्गे गुरुराजदेवादिस्तुतिवर्णनप्रसङ्गे भावध्वनिरित्यादिनिरूपणप्रसङ्गे च दार्शनिकचिन्तनानि भूरिशः समवलोक्यन्ते। प्रकृतकार्तवीर्योदयमहाकाव्येऽपि दार्शनिकचिन्तनं यथाप्रसङ्गं यत्र तत्र प्राप्यते। व्याकरणदर्शनचिन्तनमपि तेष्वन्यतमम्। अतोऽत्र प्रसङ्गोपात्तं

व्याकरणदर्शनविषयकं चिन्तनं विधीयते। विषयवस्तूपस्थापनात् पूर्वं कार्तवीर्योदयमहाकाव्यस्य सामान्यपरिचयमत्रोस्थाप्यते-

महाकाव्यमिदं सप्तदशसर्गेषु विभक्तं चतुश्चत्वारिंशदुत्तरसप्तदशशतश्लोकयुतञ्चास्ति। अस्य लेखकः सहृदयशिरोमणिः नेपालाभिजनः महाकविसुकृतिदत्तपन्तो वर्तते। अवाप्ताखिल-भुवनैश्वर्यः, प्रतापोज्ज्वलः, सुक्षत्रियः, पुराणप्रथितः कार्तवीर्यः महाकाव्यस्यास्य नायकः, नायिका स सकलभूमण्डलललनाललामभूता, शीलार्जवादिनिखिलललनोचितगुणग्रामगरिष्ठा, उच्चवंशसमुत्पन्ना कनकप्रभा वर्तते। महाकविना पुराणेतिहासप्रसिद्धां कथामङ्गीकृत्य काव्यमिदं विरचितम्। कविरयं तन्त्रविद्योपासक आसीत्। तन्त्रसम्प्रदाये **कार्तवीर्योपासनापद्धतिः, कार्तवीर्यसपर्या, कार्तवीर्यदीपदानपद्धतिः, पञ्चरात्रपद्धतिः** इत्यादयः पद्धतयः प्रचलिताः सन्ति।

वाल्मीकीयरामायणे, हरिवंशपुराणे, पद्मपुराणे, मार्कण्डेयपुराणे, वायुपुराणे, श्रीमद्भाग-वतमहापुराणे, महाभारते, रघुवंशमहाकाव्यादिष्वनेकेषु ग्रन्थेषु च कार्तवीर्योपाख्यानं भूरिशः प्राप्यते। श्रीमद्भागतादिषु पुराणेषु तु कार्तवीर्यस्य हरेरंशावताररूपेण वर्णनं वर्तते। अन्यत्र कार्तवीर्यः विष्णोरंशावताररूपेण सुधीभिः स्वीकृतः। यथा श्रीमद्भागवते–

**अर्जुनः कार्तवीर्यस्य सप्तद्वीपेश्वरोऽभवत्।**
**दत्तात्रेयाद् हरेरंशात् प्राप्तयोगमहागुणः॥**
**न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः।**
**यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः॥**[7]

महाकाव्यस्यास्यारम्भः माहिष्मतीनगरवर्णनाद् भवति। नगर्या अस्याः शासकः कार्तवीर्यस्य पिता कृतवीर्यो बभूव। सः अनपत्यतया खिन्नः कदाचिद् गुरोः दत्तात्रेयस्याश्रमं जगाम। गुरोराशीर्वादाच्च कार्तवीर्यं पुत्रमवाप। सर्वगुणसम्पन्नोऽयं पुत्रः वस्तुतः विष्णुरेवासीत्। लब्धसकलसंस्कारः, विहितानेकबाललीलः कार्तवीर्यः यथाकालं सकलक्षत्रियोचितविद्यासम्भारं दधार। ततः सः तपस्तप्तुं वनं जगाम। इन्द्रकृद्विघ्नान्निरस्य संकल्पितं तपस्तप्त्वा कार्तवीर्यः पुनः माहिष्मतीमाजगाम। पिता कृतवीर्यः सकलगुणसम्पन्नं पुत्रं राज्यं समर्प्य सपत्नीकः वानप्रस्थमालम्बे। विद्याविनयबलवीर्योद्भाषितः कार्तवीर्यः कदाचिद् विदर्भराजतनयायाः कनकप्रभायाः रूपगुणसम्पदं कर्णगोचरीचकार, लेभे च तस्याः स्वयंवरे सम्मेलितुमामन्त्रणम्। स्वयंवरे ससैन्यमुपगतं कार्तवीर्यं कनकप्रभा वरयामास।

ततः कविना उभयोः भोगविलासादिवर्णनं विधाय विस्तरेण कार्तवीर्यस्य धार्मिकता,

राज्यशासनपरिपाटी, विद्वज्जनगुणग्राहिता च वर्णिता। रावणेन सह युद्धं कार्तवीर्यकृतो रावणपराजयः तद्दर्पभङ्गश्चेति व्याख्याय कविना काव्यान्ते कार्तवीर्यस्य वैराग्यं मोक्षोपलब्धिश्च वर्णिता। अन्तिमे सर्गे सुकृतिदत्तपन्तेन स्वस्य वंशस्य परिचयमुपस्थाप्य काव्यं समाप्तिमुपनीतम्।

एतदनन्तरं प्रकृतमनुसृत्यात्र महाकाव्ये यथोपलब्धसन्दर्भानुसारं व्याकरणदर्शनसम्बन्धिविषये चर्चा विधीयते–

महाकविसुकृतिदत्तेन महाकाव्येऽस्मिन् व्याकरणम् (पाणिनीयव्याकरणम्) व्याकरणस्य 1. नागाधीशवचः, 2. फणिपतिभणिति, 3. शब्दस्मृति, 4. शब्दशास्त्र, 5. शब्दप्रपञ्च-प्रभृतयः शब्दाः प्रयुक्ताः।

**नागाधीशवचोविचारविशदे गङ्गेश्वरोक्ताम्बुधौ**
**मन्थाद्रिप्रतिमे च तत्र युगले स्वान्तं समालम्बिते।**[8]
**फणिपतिभणितिप्रविष्टचेता उदयनवाचि विशारदः स्मृतिज्ञः।**
**भरतवचनभारतोक्तिविज्ञो मम कृतिदर्शनमातनोतु विद्वान्।।**[9]
**शब्दप्रपञ्चरसिका इह साधयन्ति मा स्म प्रभुर्जगति तादृशसाधुतायै।।**[10]

आधिक्येनायं शब्दस्मृतिरिति शब्दं प्रयुङ्क्ते।

**आख्यातकृत्तद्धितप्रत्ययार्थमुपात्तपूर्वप्रकृतिः प्रयत्नात्।**
**कथं सदृश्यं बहुधातुरम्या शब्दस्मृतिर्विस्तृतिमेतु तत्र।।**
**चित्रन्तु शब्दस्मृतिभाग्जनोऽपि वृद्ध्या गुणन्न प्रतिषेधतीह।**
**ह्रस्वोऽपि सम्बुद्धिवशाद् गुणाद्यः संबुद्धिनाशे न करोति यत्नम्।।**[11]

प्रथमसर्गे श्लोकद्वयेन (श्लोक सं.27-28) उभयत्र शब्दस्मृतिप्रयोगपूर्वकं कविराह– यथा शब्दस्मृतौ (व्याकरणे) अनेकेषां धातूनां तन्निर्मितशब्दानामाख्यातपदानां व्युत्पन्नानाञ्च सत्ता, तथैव माहिष्मत्यां नगर्यामपि स्वर्णरजतादीनां धातूनां तन्निर्मितवस्तूनाञ्च सत्ता वर्तते। यथा कृ धातुतः करोति, कर्ता, कारकः, कर्तव्यः, कृतिः, क्रिया, कृत्रिमम्, कर्तृत्वम्, कारकत्वम् इत्यादयः शब्दा भवन्ति। तथैव माहिष्मत्यां नगर्यामपि सुवर्णतः कटक–कुण्डल–ललन्तिकामुद्रिकादीन्याभूषणानि निर्मीयन्ते इत्युभयत्र बहुधातुरम्यत्वं समानम्। एवं सप्तविंशतितमश्लोकेनोभयत्र समानतां प्रदर्श्य, अष्टाविंशतितमश्लोकेन कविनैवं भिन्नता प्रदर्शिता–शब्दशास्त्रे हि वृद्धा गुणाः प्रतिषिध्यन्ते, माहिष्मत्यां तु न तथा प्रतिषेधः,

यतस्तत्र दयादाक्षिण्यादयो गुणा अपि सन्ति, धनधान्यादिसम्पदां वृद्धिरपि वर्तते। एवं शब्दशास्त्रे संबुद्धिं निमित्तीकृत्य गुणे– हे हरे, शम्भो, इत्यादिषु संबुद्धिनिमित्तके ह्रस्वे हे नदि! हे वधु! इत्यादिषु च संबुद्धिर्लुप्यते, परन्तु माहिष्मत्यां नगर्यां दयादाक्षिण्यादिगुण-समुदये, शारीरिककार्श्यदौर्बल्यादिसमुद्भवे च सम्बुद्धेः (मानवीयविशिष्टबुद्धेः) नाशो नैव भवति।

(ख) कार्तवीर्योदयकाव्यस्य नायको राजकुमारः परम्परानुसारेण साङ्गं वेदमध्यैत–

**तं गुरुं रुरुभावेन चर्मणा वेष्टितं पुरुमनीषमादरात्।**
**साङ्गवेदमुपशिक्षयन्पुरो पाठ्यत्कुलपरम्परागतम्।।**[12]

स च गुरुणा प्रकृतिप्रत्ययविभागपूर्वकं वैदिकशब्देषु उदात्तानुदात्त–स्वरित–स्वरानध्यापितः–

**प्रत्ययप्रकृतिभागभाविताग्रहस्वरितसाधुसेविता ।**
**रावणोदितमदर्थनाशुगा तस्य चेतसि गुरोः श्रुताभवत्।।**[13]

(ग) पञ्चमसर्गस्थश्लोकत्रयेण (श्लोक सं.76-78) सुकृतिना कविना कार्तवीर्यस्य व्याकरणाध्ययनसन्दर्भः समुपस्थापितः। तत्र तेनाधीतविषयाः स्पष्टमुल्लिखिताः। कवेर्मतानुसारेण कार्तवीर्यार्जुनसमये ऐन्द्रव्याकरणं माहेश्वरव्याकरणञ्चास्ताम्। अगाधसागरायिते अपरिमिते ते द्व एव कार्तवीर्योऽधीतवान्। अनयोरध्ययनेन सम्यग्ज्ञानेन मानवानां देवसायुज्य-(मोक्ष) प्राप्तिः सुलभा। तदानीमपि सूत्राणां वार्तिकानां तदर्थसंग्रहादीनाम् (व्याख्यानादी-नाम्) अध्ययन-समीक्षण-विवचनादिभिः सर्वविधशङ्कासमाधानं क्रियते स्म। स मार्गः कार्तवीर्येण समाश्रितः। कार्तवीर्यश्च नामाख्यातादिपदानामध्ययनं कृत्वा वाक्यव्याकरणं कारकं समधीतवान्। सम्भवतः तदानीं कारकाध्ययनम् (व्याकरणाध्ययनम्) अन्तिमं मन्यते स्म। ऐन्द्र–माहेश्वर–व्याकरणाध्ययनविषये, व्याकरणशास्त्रस्य ईशसायुज्यप्रदत्वे च तत्र कविरेवमाह–

**इन्द्ररुद्रमुखनिर्मितं हितं शब्दशास्त्रममितं स दृष्टवान्।**
**यद्विदामिह नृणां न दुर्लभं देवतापदयुगं प्रकीर्तितम्।।**[14]

(घ) एवं परिसंख्यालङ्कारप्रयोगप्रवङ्गे शब्दशास्त्रस्य चर्चां कुर्वन् कविर्वदति–

**साहित्यशास्त्रविदुषि व्यभिचारदृष्टिर्वृत्त्यर्थविग्रहगिरः खलु शब्दशास्त्रे।**[15]

विशेषगुणविशिष्टे सज्जने भूपे प्रशासके सति तस्य राज्ये वृत्त्यर्थविग्रहवाक्यानि व्याकरणशास्त्रे समासप्रकरणे भवन्ति, न तु जनसमाजे। समासे परार्थाभिधानं वृत्तिः,

वृत्त्यर्थावबोधक वाक्यं विग्रहः, इति रीत्याध्यापनं भवति। समाजे पुनर्वृत्तिजीविका, तन्निमित्तं विग्रहः, स न भवति। सर्वे जनाः स्वोचितां वृत्तिं प्राप्नुवन्ति। सम्प्रति राष्ट्रेषु लोकसेवा–तोकसेवेत्यनयोः चर्चा श्रूयते, मन्त्रिणो हि स्वजनेभ्यस्तोकसेवामार्गेण वृत्तीर्ददति, एवञ्च लोकसेवाप्रतीक्षमाणानां तोकसेवावद्भिः सह विग्रहो भवति। अयमेव हि लोके वृत्त्यर्थविग्रहः। कार्तवीर्यसुराज्यवर्णनेऽपि परिसंख्यालङ्कारे तथैव वर्णनं कृतम्–

**वृत्तिर्नृणां विग्रहयुक् च शास्त्रे।**[16]

(ङ) कविना सुकृतिदत्तेन 'सुहृद्–दुर्हृदौ मित्रामित्रयोः' इति एकेनैव लक्षणेन सुहृद्–दुर्हृत्पदनिपातनकारिणां तथा उपसर्गाद् विप्रादिवर्णननिपातनपराणां शाब्दिकानामुपहास एकेन पद्येन कृतः–

**ये दुर्हृदञ्च सुहृदं युगपन्निपात्य विप्रादिवर्णनमुपसर्गवशान्निपात्य।**
**शब्दप्रपञ्चरसिका इह साधयन्ति मा स्म प्रभुर्जगति तादृशसाधुतायै॥**[17]

(च) कविना नायकस्य कार्तवीर्यस्य विवाहसन्दर्भे उपमारूपेण व्याकरणसाध्यप्रकृति-प्रत्यययोगः सन्दर्शितः। यथा प्रकृतिप्रत्यययोगेन सार्थकं निजरूपसम्पद्युक्तं व्युत्पन्नं पदं विधिसूत्रेण सम्पाद्यते, तथैव दैवशासनेन वधूवरयोः साधुतायुक्तं निजस्वरूपसंपद्विशिष्टं सङ्गतिपूर्णं युग्मकं सम्पद्यते–

**प्रत्ययप्रकृतिवद् युवां विधेः शासनं समधिगम्य सङ्गतौ।**
**प्राप्नुतश्च निजरूपसम्पदा सार्थकत्वमनुभूतसाधुताम्॥**[18]

(छ) **उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतम्।**
**अपवर्गे तृतीयेति भणितः पाणिनेरपि॥**[19]

महाकविश्रीहर्षस्यैतत् पद्यं स्मरताभ्यसता च कविना सुकृतिना एकस्मिन् पद्ये द्वितीया–तृतीयापदयोः, द्वितीय–तृतीयपदयोश्चेति प्रयोगचमत्कारः प्रदर्शितः तत्पदार्थबोधे मस्तिष्कञ्च चक्रायते–

**मन्ये द्वितीयामहमद्वितीयं मित्रं तृतीयार्थपयोधिपारे।**
**विना तृतीयां प्रकृतिं द्वितीया प्रिया न कस्यास्ति युगे द्वितीये॥**[20]

द्वितीयाम् = भार्याम्, तृतीयार्थपयोधिपारे = धर्मार्थकाममोक्षार्थेषु तृतीयार्थः, कामसमुद्रपारे। तृतीयां प्रकृतिं = क्षीवम्। द्वितीये युगे = बाल्यात् परे वयसि, यौवने।

(ज) वैयाकरणाः हि शब्दसाधुत्वासाधुत्वे जानन्ति।

ते विवेचयन्ति–इमे शब्दाः, इमे अपशब्दाः इति। न केवलं नाम्ना, उपाधिना

वा वैयाकरणोऽहमिति डिण्डिमघोषं कुर्वता साधवोऽसाधवश्च शब्दाः विवेच्यन्ते, किन्तु शब्दस्मृतिविदा आप्तेनैव शब्दानां साधुत्वासाधुत्वे निश्चीयते। अयमर्थः कविना एकस्मिन् पद्ये प्रदर्शितः–

**मन्ये च क्लृपे नाप्यपशब्दशङ्का शब्दस्मृतिज्ञैस्सहिते सदस्यैः॥**[21]

**स्फोटवाद–शब्दब्रह्मबादः–**महाकविसुकृतिदत्तः काव्यमिदं दशमसर्गान्तपद्ये **''सत्स्फोटवादानुजम्''** आघुषत्। शाब्दिकपरम्परायां स्फोटः सर्वशब्दार्थोभयरूपो निर्विकारो निरवयवो हृदयाकाशस्थः प्रणवरूपः शब्दब्रह्मात्मकः। शब्दब्रह्म एव सर्वप्रपञ्चकारणं विवर्तोपादानमनाद्यनन्तं निर्विकारमिति शाब्दिकाः।**'ओङ्कार एव सर्वा वाक्'** इति श्रुतिः।

**ओमित्येतदक्षरमिदं सर्वम्।**[22]

''अकार एव सर्वा वाक्'' इत्यपि पाठः। तत्र अकारः परब्रह्मात्मको वाच्यरूपः अकारोऽपरब्रह्मात्मको वाचकरूपः। एवमोंकारस्यैव वाच्यवाचकता कविना सुकृतिदत्तेन स्वीकृता। वर्णमालाया आदिमोऽवर्णो वाचकः, तद्भिन्नः शब्दरूपः अः वाच्य इति कवेर्मतं दृश्यते–

**निराकृतो वर्णगणादवर्णः संस्थापितो मुख्यतयापि तत्र।**
**विशेषविज्ञेन कथन्नृपेण मन्येऽक्षरत्वेन स शब्द्यते स्म॥**[23]

उत्पादविनाशरहितं शब्दब्रह्म यदक्षरं तदेव घटाद्यर्थरूपेण विवर्तते इति शब्दब्रह्मवादिनो वैयाकरणाः आमनन्ति। यथा-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[24]

महाकाव्येऽस्मिन् कविसुकृतिदत्तः विवर्तवादं स्वीकृतवान्। शब्दात्मकं वाग्रूपं ब्रह्म विवर्तत इति स्पष्टं नोक्तम्, परन्तु जगदीश्वरविवर्तवादस्तेन समुल्लेखितः–

**विवर्तमानञ्जगदीश्वरे तदनाद्यविद्याकृतविभ्रमेण।**
**विद्याविलासेन विचार्यमाणामाभात्यधिष्ठानविशेषरूपम्॥**[25]

ब्रह्मविवर्तवादिभिर्वेदान्तिभिर्ब्रह्माद्वैतवादः स्वीक्रियते, शब्दब्रह्मविवर्तवादिभिः शाब्दिकैः शब्दब्रह्माद्वैतवादः स्वीक्रियते।

इत्थं प्रकृते कार्तवीर्योदयाख्ये महाकाव्ये यथामति शब्दशास्त्रीयदर्शनसम्बद्धो विषयः समुपस्थापितः अतिगम्भीरतरविषयकारणादत्र कविचिन्तनबाहुल्येऽपि मम स्थूलबुद्धौ यः ज्ञानगम्यविषयः चिन्तनेनागतः स विदुषामग्रे प्रस्तुतः भविष्यदध्येतॄणां कृते मार्गावलम्बनेऽयं सहायको भविष्यतीति मन्ये। इति।।

***

**सन्दर्भाः–**

1. सर्वदर्शनसंग्रहः
2. पाणिनिसूत्रम् 1.1.33
3. महाभाष्यम् 1.1.33 सूत्रे
4. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका 122
5. तत्रैव, कारिका 121
6. महाभाष्यम्, उद्द्योतटीका
7. श्रीमद्भागवतम्, 9.23-25
8. कार्तवीर्योदये, सर्ग 17 श्लो.8
9. कार्तवीर्योदये, 17.17
10. कार्तवीर्योदये, 8.89
11. कार्तवीर्योदये, 1.27-28
12. कार्तवीर्योदये, 5.62
13. कार्तवीर्योदये, 5.66
14. कार्तवीर्योदये, 5.76
15. कार्तवीर्योदये, 8.64
16. कार्तवीर्योदये, 16.10
17. कार्तवीर्योदये, 8.88
18. कार्तवीर्योदये, 10.45
19. नैषधीयचरितम्, सर्ग 13
20. कार्तवीर्योदये, 10.16
21. कार्तवीर्योदये, 16.40
22. माण्डूक्योपनिषत्, ईशादि नौ उपनिषद्, पृ.563
23. कार्तवीर्योदये, 16.14
24. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका 1
25. कार्तवीर्योदये, 16.89

***

# कुमारसम्भवे कालिदासस्य वक्रोक्तिविन्यासपूर्वक-ललितार्थनिबन्धने नैपुणी

**राजकुमार मिश्रः**

**येन स्वेन गुणेन चारुकलया शब्दार्थसद्योगतो**
**लोके दम्भपरास्समस्तकवयो दासीकृता वा जिताः।**
**येनाऽद्यापि वितन्यते नवनवं तत्त्वं स्वकाव्यश्रिया**
**सोऽयं भाति महाकविः कुलगुरुश्श्रीकालिदासोऽनघः॥**[1]

अस्माकं संस्कृतवाङ्मये महाकविकालिदासस्य स्थानं वरीवर्ति। विद्वांसोऽद्यापि कालिदाससदृक्षान् गुणान् अन्यस्मिन् अदृष्ट्वा कथयितुं विवशाः–'अद्यापि तत्तुल्यकवेर-भावादनामिका सार्थवती बभूव'इति। काव्ये शब्दस्य अर्थस्य च तुल्यबलः प्रयोगो भवति, तथापि सहृदया अर्थपक्षे समधिकतरा रुचिमन्तो भवन्ति। भावुकरुच्याधारेण पण्डितराजो जगन्नाथो रमणीयार्थस्यैव काव्यत्वं स्वीकुर्वन् स्वमतमित्थं स्फोरयते–'रमणीयार्थप्रतिपादकः शब्दः काव्यम्।' कवयः अस्यैव रमणीयार्थस्य ललितार्थस्य वा निर्वाहे विविधान् उपायान् समाश्रयन्ति, ते च क्वचिद् ध्वनिः, क्वचिद् रसः, क्वचिद् वक्रोक्तिः अलङ्कारादिर्वा। वस्तुतः कवेः कवित्वस्यैव एतद् वैलक्षण्यं येन तस्य काव्ये सर्वेषां सिद्धान्तानाम् अपृथग्यत्नः प्रयोगो जायते। मम कथनस्याऽऽधारो महाकविकालिदासपाणिपल्लवप्रणीतानि काव्यानि सन्ति तदीयकाव्येषु सहृदयाः स्वस्वदृष्ट्या विविधानि तत्त्वानि अधुनाऽपि अवलोकयन्ति। मन्ये काव्यशास्त्रे विविधानि प्रस्थानानि विचारपदवीमुदयाध्वानं वा नो समवातरिष्यन् यदि नाऽभविष्यन् कृतिनः कालिदासस्य अभिज्ञानशाकुन्तलप्रमुखा विविधवृत्तविनिबद्धगीतयो दर्शितजीवननीतयो भृतात्मोज्ज्वलसंस्कृतयो गर्भीकृतचारुचमत्कृतयः कृतयः। काव्यशास्त्रस्य मुख्यतमेषु सिद्धान्तेषु ध्वनिसिद्धान्तः स्यादथवा रससिद्धान्तो वक्रोक्तिसिद्धान्तो वा तत्र काव्यशास्त्रिभिः प्राचुर्येण कालिदासस्यैव पद्यानि उदाहृतानि स्वसिद्धान्तस्थापनायाम्। आनन्द-

वर्धनाचार्यः कालिदासस्य आधमर्ण्यमित्थं निवेदयति–**अस्मिन् अतिविचित्र-कविपरम्परावाहिनि संसारे कालिदाससदृशा द्वित्राः पञ्चषा वा महाकवयो गण्यन्ते।'**[2] वक्रोक्तिजीवितकारो राजानकः कुन्तकोऽपि वक्रोक्तिसिद्धान्तस्य स्थापनायां साक्षिरूपेण बहुत्र कालिदासमेवोदाहरति। राजानकः अभिज्ञानशाकुन्तलस्य, रघुवंशस्य, मेघदूतस्य च बहूनि पद्यानि निदर्शनरूपेण प्रस्तौति किन्तु ऋतुसंहारं कुमारसम्भवं तु तदपेक्षया नगण्यं न्यूनञ्चोदाहरति। यदि कालिदासस्य कुमारसम्भवेऽपि ललितार्थनिर्वाहे वक्रोक्तिसमवलम्बनं दिदृक्षा तर्हि तत्रापि अनेकानि स्थलानि सन्ति यत्र स्वललितार्थनिर्वाहे कविप्रयुक्तवक्रोक्तिर्द्रष्टुं शक्यते। अतः किञ्चिद् नावीन्यमानेतुकामेन मया प्रस्तूयमाने शोधपत्रेऽस्मिन् कुमारसम्भवस्थितानि वक्रोक्तिस्थलानि परिचीय परिशीलितानि। सर्वप्रथमं प्रकृतविषयस्य सारल्येन अवबोधाय का नाम वक्रोक्तिः? इति उच्यते–

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।**
**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥**[3]

अर्थात् प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाऽभिधा वक्रोक्तिरुच्यते। कीदृशी वक्रोक्तिः? वैदग्ध्यभङ्गीभणितिरिति। सामान्येन अयमाशयः प्रतिफलति यत् कथनस्य विशिष्टो लोकोत्तरो वा प्रकारो वक्रोक्तिरुच्यते। लक्षणे वैदग्ध्यभङ्गीभणितिरिति प्रयोगात् शाकटिकादिभिः उच्चार्यमाणेषु वाक्येषु काव्यत्वप्रसक्तेः स्वतः एव निरासो बोद्धव्यः। कुन्तकः षड्विधां वक्रोक्तिं विभजते–

**वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।**
**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः।**
**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।**
**यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥**
**वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः।**
**उच्यते सहजाहार्यसौकुमार्यमनोहरः॥**[4]

एतासु वर्णविन्यासवक्रता–पदपूर्वार्धवक्रता–प्रत्ययाश्रयवक्रता–वाक्यवक्रता–प्रकरणवक्रता–प्रबन्धवक्रतासु प्रत्येकम् अपि वक्रोक्तेर्बहवो भेदा राजानककुन्तकेन प्रतिपादिताः, किन्तु प्रकृते तत्प्रदर्शनं न युज्यते।

इन्द्रादीन् देवान् तारकासुरस्य वधोपायं वदतो ब्रह्मणः कथने पर्यायवक्रता वर्तते येन अर्थे लालित्यं द्विगुणितं जायते–

**तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः।**
**मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः॥**[5]

तस्य शितिकण्ठस्य अर्थात् शिवस्य आत्मा अर्थात् पुत्रो वः युष्माकं देवानामित्यर्थः सैनापत्यं सेनाध्यक्षः तम् उपेत्य प्राप्य भूत्वेत्यर्थः वीर्यविभूतिभिः पराक्रमैः सुरबन्दीनां देवाङ्गनानां वेणीः मोक्ष्यते इति वाक्यार्थः प्रस्तुतपद्यस्य। अस्य अर्थस्य लालित्यवर्धनाय महाकविना कालिदासेन 'आत्मा' इति पदं प्रायोजि। अत्र पूर्वार्धवक्रतायाः पर्यायवक्रतानामको भेदो वर्तते। 'तारकासुरवधाय शिवस्य पुत्रः सुतो सेनापतिः भविष्यति' इति वक्तव्ये 'शिवस्य आत्मा' इति पदमुपन्यस्तं वर्तते। पुत्रः इति प्रयुक्ते शङ्करस्य आत्मा एव द्वितीयं वपुः धृत्वा देवानां सेनापतिः भविष्यति ये लोकोपकारादयो गुणाः ते सर्वे वस्तुत आत्मधर्माः, अतः शिवगतानां लोकोपकारादयो धर्माणां पुत्रेऽपि प्रतीतये पुत्रस्य अनेकेषु पर्यायेषु सत्स्वपि 'आत्मा' इति कविप्रयुक्तं पदं कमनीयतां सूते। पुनश्चात्र 'शिवस्य आत्मा पुत्रो वा तारकासुरस्य वधं करिष्यति' इति वक्तव्ये 'शिवस्य आत्मा सुरबन्दीनां वेणीः मोक्ष्यते' इति कथनं वक्रताश्रितमेव वर्तते, येन अर्थे कापि लालित्यधारा उच्छलतितराम्।

एवमेव कुमारसम्भवे अर्थे लालित्यमानेतुकामेन महाकविना कालिदासेन विशेषणवक्रताऽपि बहुत्र प्रयुक्ता यथा–

**सर्वं सखे! त्वय्युपपन्नमेतदुभे ममाऽस्त्रे कुलिशं भवांश्च।**
**वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च॥**[6]

अत्र इन्द्रेण कामदेवः सम्बोध्यते। मम वज्रं भवान् (कामदेवः) च उभे अपि मम अस्त्रे स्तः। मम वज्रं पुनः तपोवीर्यप्रभावधारिषु कुण्ठम् अर्थात् प्रहारे असमर्थं जायते किन्तु भवद्रूपम् अस्त्रं सर्वतोगामि साधकं च वर्तते। अत्र पद्ये कामदेवः अस्त्रमितिरूपेण चित्रितो वर्तते, तद्विशेषणं सर्वतोगामि साधकं चेति पदे स्तः। अत्र ''मम कुलिशं भवान् च मम अस्त्रे वर्तेते तत्र मम अस्त्रं विफलं भवति किन्तु भवान् सर्वतोगामी साधकश्चेति वर्तते' इति रूपेण कामदेवे तद्विशेषणे च पुंलिङ्गस्यापि प्रयोगः शक्य आसीत्, किन्तु पुंलिङ्गे प्रयुक्ते सति कामदेवस्य अस्त्रत्वं व्याहन्येत, अतः तत्र कामदेवे अस्त्रत्वस्य अक्षतत्वमित्यबोधाय तद्विशेषणरूपेण 'सर्वतोगामि' 'साधकं' चेति पदे नपुंसकलिङ्गे प्रयुक्ते, तेन रमणीयता समुदेति।

ब्रह्मचारी पार्वतीं तत्तपस्यारहस्यविषये वक्रतापूर्णगिरा इत्थं पृच्छति–

**अतोऽत्र किञ्चिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः।**
**अयं जनः प्रष्टुमनास्तपोधने! न चेद्रहस्यं प्रतिवक्तुमर्हसि॥**[7]

अत्र वर्णविन्यासवक्रतायाः पुरुषवैचित्र्यविहिता वक्रता वर्तते। अयं वक्रताप्रकारः काव्यवैचित्र्यार्थं 'युष्मद्यस्मदादि'–प्रयोक्तव्ये प्रातिपादिकमात्रप्रयोगाज्जायते। प्रकृते 'अहम् प्रष्टुमिच्छामि' इति 'अस्मत्'–पदस्य उत्तमपुरुषस्य प्रयोक्तव्ये 'अयं जनः प्रष्टुमनाः' इति प्रथमपुरुषः प्रयुक्तो महाकविना कालिदासेन। यद्यत्र कालिदासेन 'अहं प्रष्टुमनाः' इति प्रयोगः कृतः स्यात् तदा ताटस्थ्यप्रतीतिर्न सम्भाव्येत किन्तु 'अयं जनः प्रष्टुमनाः' इति प्रयोगे ताटस्थ्यप्रतीतिः सहृदयहृदये उत्पद्यते।

एवमेव कुमारसम्भवे गोपितरूपस्य ब्रह्मचारिणः शिवस्य पार्वतीं प्रति वार्तालापक्रमे कारकवक्रताऽपि दृश्यते यथा–

**दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः।**
**अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत्॥**[8]

यत्र अचेतनस्य पदार्थस्य चेतनत्वारोपेण चेतनस्यैव क्रियासमावेशलक्षणं रसादिपरिपोषधिया कर्तृत्वादिकारकं निबध्यते तत्र कारकवक्रता भवतीति लक्षणात् प्रस्तुते पद्ये 'रत्नं न अन्विष्यति' इति प्रयोगे रत्नं कर्तृ वर्तते यच्च अचेतनम् अतः अस्मिन् अचेतने रत्नरूपकर्तरि चेतनेन सम्पाद्यमानायाः क्रियायाः समावेशो न सम्भवः किन्तु महाकविना कालिदासेन अचेतने कर्तरि चेतनत्वारोपं विधाय तत् कर्तृतया प्रयुक्तं येन काव्यार्थो लालित्यपरो जायते।

इत्थमेव अपरस्मिन् पद्येऽपि महाकविकालिदासेन कारकवक्रता आश्रिता वर्तते यथा–

**निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते।**
**न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम्॥**[9]

अत्र 'सोष्मणा निःश्वसितेन निवेदिता' इति भावे प्रयोगो वर्तते। 'श्वासः' अत्र कर्ता वर्तते, अयं हि 'श्वासः' वाण्या सम्पाद्यमानायाः निवेदनरूपक्रियायाः कर्ता भवितुं नार्हति तथापि महाकविना कालिदासेन तस्मिन् निवेदनरूपक्रियायाः सामर्थ्यं समुपवर्ण्य कर्तृत्वं साधितम् अतः कारकवक्रता स्पष्टैवास्ति।

महाकविकालिदासेन स्वकुमारसम्भवे अर्थचारुत्वदृष्ट्या वाक्यवक्रताऽपि प्रयुक्ता वर्तते–

**अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः।**
**करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः॥**[10]

अत्र 'तव प्रियः सौभाग्यवञ्चितः यो हि त्वां न पश्यति' इत्यर्थस्य प्रतिपादने 'तव प्रियं सौभाग्यमदेन वञ्चितमिति भावये, यतो यः स्वमुखम् अस्य तव नेत्रस्य लक्ष्यं न

करोति' इति वक्रताविधानेन अर्थः प्रकाशितः, इदं हि वक्रताविधानं जनयति सहृदयवेद्यम् अर्थे चारुत्वम्। अत्र वाक्यवक्रता वर्तते। अस्यां वाक्यवक्रतायां सर्वेऽपि अर्थालङ्कारा अन्तर्भवन्ति, यथोक्तं कुन्तकेन–

**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।**
**यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥**[11]

उपर्युक्ते पद्ये 'तव प्रियः सौभाग्यगुणेन वञ्चितः' इत्यस्य हेतुः 'पार्वत्याः नेत्रस्य लक्ष्यं शिवमुखं नास्ति' इति हेतुरूपन्यस्तः तस्मात् काव्यलिङ्गालङ्कारः किन्तु कुन्तकमते प्रदर्शितकारिकानुसारेण अलङ्काराणामन्तर्भावो वाक्यवक्रतायां भवतीति दृशाऽत्र वाक्यवक्रता सहृदयस्वान्ते कामपि विच्छित्तिं तनोति।

वस्तुतः अर्थे चमत्कारं कविकृतसुन्दरपदसन्निवेश एव जनयति। कोऽपि कविः स्वशिल्पविधानेनैव परां कोटिं याति। पदप्रयोगविषये कालिदासः कालिदास इव। महाकविकालिदासकाव्ये वक्रताया भिन्ना–भिन्ना स्थितिः प्राप्यते। दृश्यतां महाकविकालिदासस्य रमणीयार्थबोधने पर्यायवक्राताचमत्कारः–

**द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।**
**कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥**[12]

प्रस्तुते पद्ये ब्रह्मचारी पार्वतीं शिवेन सह विवाहार्थं कृतसङ्कल्पाद् विमुखीकरोति। अत्र 'सम्प्रति द्वयं शोचनीयतां गतम्' इति पदेन व्यङ्क्तो बीभत्सात्मको यः काव्यार्थो वर्तते तद्व्यक्तीकरणे केवलं 'कपालिन्' पदमेव क्षमते। यद्यपि शङ्करस्य सहस्रं पर्याया वर्तन्ते, किन्तु तेषु यथा सामर्थ्यं नास्ति यथाऽत्र कपालिन् पदे वर्तते। अतोऽत्र शब्दान्तरेण तच्चारुत्वनिष्पादने अशक्यत्वात् पर्यायवक्रता वर्तते, अत्र जुगुप्सारूपस्य अर्थस्य कोऽपि वाचकः शब्दः प्रयुक्तो नास्ति तथापि सोऽर्थः केवलं 'कपालिन्' पदेनैव व्यक्तिम् आगतः कामपि अभिख्यां तनोति।

महाकविना कालिदासेन स्वकथने चारुत्वसम्पादनाय क्वचित् संवृत्तिवक्रताऽपि अवलम्बिता वर्तते। यथा–

**निर्वायतामालि! किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।**
**न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्॥**[13]

यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन केनापि निकर्षेणोत्कर्षेण वा साक्षाद् व्यक्ततया अभिधातुम् अशक्यं भवति तथा च सर्वनामादिसंवृत्तिसामर्थ्योपयोगिना शब्देन तदभिधानं

क्रियते तत्र संवृत्तिवक्रता भवतीति कुन्तकस्य आशयः। प्रकृते अयं वटुः किमपि विवक्षुः इति पार्वत्या कथितम्। अत्र वटुः वस्तुतः किं विवक्षुः इति निर्देशो न कृतः, केवलं 'किम्' इति पदेन निकर्ष उत्कर्षो वा प्रतिपादितः, अतः पद्येऽस्मिन् संवृत्तिवक्रता वर्तते।

इत्थं द्रष्टुं शक्यते यन्महाकविकालिदासेन कुमारसम्भवे अर्थे किञ्चिल्लालित्यरूपं वैचित्र्यम् आनेतुं बहुत्र वक्रोक्तिः आश्रिता वर्तते।

***

**सन्दर्भाः–**


1. लेखकेन विरचितम्।
2. ध्वन्यालोकः, पृ.11 (जगन्नाथ पाठकः)
3. वक्रोक्तिजीवितम्, प्र.उ.का.सं.10
4. वक्रोक्तिजीवितम्, प्र.उ.का.सं.19-21
5. कुमारसम्भवम्, द्वि.स.61
6. कुमारसम्भवम्, तृ.स.12
7. कुमारसम्भवम्, पं.स.40
8. कुमारसम्भवम्, पं.स.45
9. कुमारसम्भवम्, पं.स.46
10. कुमारसम्भवम्, पं.स.49
11. वक्रोक्तिजीवितम्, प्र.उ.का.सं.20
12. कुमारसम्भवम्, पं.स.71
13. कुमारसम्भवम्, पं.स.83


***

# ङमुड्विधायकसूत्रे नागेशभट्टोजिदीक्षितयोर्मतवैचित्र्यम्

**डा. गणेश्वरनाथ झाः**

'ङमो ह्रस्वादचि ङमुण् नित्यम्' इति अष्टमाध्यायस्य तृतीयपादस्य द्वात्रिंशत्तमं ङमुडागमविधायकं पञ्चपदात्मकमिदं सूत्रम्। तत्र ङमः इति पञ्चम्यन्तं ह्रस्वादिति पञ्चम्यन्तम् अचीति सप्तम्यन्तं ङमुडिति प्रथमान्तं नित्यमित्यपि प्रथमान्तं पदम्। अत्र ह्रस्वादित्यत्र या पञ्चमी सा दिग्योगलक्षणा पञ्चमी वर्तते। एवञ्च दिग्योगलक्षणपञ्चम्यन्तपदघटिते शास्त्रे निर्दिष्टाद् उत्तरस्य इति पदद्वयमुपतिष्ठते इत्यर्थिकया तस्मादित्युत्तरस्य इत्यनया परिभाषया निर्दिष्टे पूर्वस्येति पदद्वयस्योपस्थितिर्जायते। तत्र निर्दिष्टपदार्थस्य ह्रस्वपदार्थेऽभेदेनान्वयः उत्तरपदार्थस्य च अभेदेन ङम्पदार्थे अन्वयः ह्रस्वाव्यवहितोत्तरत्वविशिष्टः यो ङम् इति अयमर्थः निष्पद्यते। अस्मिन् सूत्रे पदस्य इत्यधिक्रियते तच्च ङम इत्यनेन सामानाधिकरण्यानुरोधात् पदस्येति षष्ठ्यन्तं पदं पञ्चम्यन्ततया विपरिणम्यते। एवञ्च ङम्पदार्थस्य पदपदार्थे अभेदसम्बन्धेन विशेषणाद् अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकं पदम् आत्मान्तस्य बोधकं स्याद् इत्यर्थकेन येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधौ सति ह्रस्वाव्यवहितोत्तरत्वविशिष्टो यो ङम् तदन्तं यत् पदमित्ययमर्थो निष्पद्यते। अत्र सूत्रे अचीति सप्तम्यन्तं पदं दृष्ट्वा तस्मिन्निति निर्दिष्टे पूर्वस्येति शास्त्रस्य ङम इति दिग्योगलक्षणपञ्चम्यन्तं पदं दृष्ट्वा तस्मादित्युत्तरस्य च प्राप्तिरित्युभयोः सूत्रयोः प्राप्तयोः सतोः **उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्**[1] इत्यनया परिभाषया पञ्चमीनिर्देशस्य बलवत्त्वबोधनेन अचीति सप्तम्यन्तं पदं षष्ठ्यन्ततया विपरिणम्यते। एवञ्च ह्रस्वा-व्यवहितोत्तरत्वविशिष्टो यो ङम् तदन्तं च यत् पदं तदव्यवहितोत्तरत्वविशिष्टस्य अचः नित्यं ङमुडागम इत्यर्थो निष्पद्यते। अत्र सूत्रार्थे दीक्षितनागेशयोः महान् मतभेदो दृश्यते। तत्र पूर्वं दीक्षितमतं प्रस्तूयते–

**दीक्षितमतम्–**

दीक्षितमते च ह्रस्वाव्यवहितपूर्वत्वविशिष्टो यो ङम् तदन्तं च यत् पदं तदव्यवहितो-

त्तरत्वविशिष्टाचो नित्यं ङमुडागमः स्यादित्ययमेवार्थः। अत्र ङम् इति प्रत्याहाररूपायां सञ्ज्ञायां कृतं टित्त्वं सामार्थ्यात् सञ्ज्ञिभिः सह सम्बध्यते तेन **यथासंख्यमनुदेशः समानामिति** सूत्रस्य प्रवृत्त्या ङुट् णुट् नुट् एते त्रयः आगमाः ङम्पदबोध्यस्य क्रमेण भवन्ति इति अर्थः निष्पद्यते। अत्र इयमाशङ्का जायते–यत् सर्वत्र विशेष्यवाचकपदानुरोधादेव विशेषण-वाचकस्य पदस्य विभक्तिविपरिणाम उक्तः किन्तु अत्र विशेषणवाचकपदं ङम इति तच्च पञ्चम्यन्तं तत्समानाधिकरण्यानुरोधात् विशेष्यवाचकस्य पदस्य पञ्चम्यन्तस्य विपरिणामो नोचितः इति दीक्षितोक्तार्थः नैव सुष्ठु प्रतिभाति इति चेदुच्यते विशेषणवाचकविभक्तिविपरिणामो न सार्वत्रिकः यतोहि–**टाङसिङसामिनात्स्याः**[2] इत्यस्मिन् सूत्रे अङ्गस्य इत्यधिक्रियते **अतो भिस ऐस्**[3] इत्यतः अत इत्यनुवर्तते। तत्र अत इति अङ्गस्य इत्यत्र विशेषणतया अन्वेति। अत्र विशेषणवाचकपदम् अत इति तच्च पञ्चम्यन्तं, पूर्वसूत्रे तथा दृष्टत्वात्। एवञ्च अत इति पञ्चम्यन्तपदसामानाधिकरण्यानुरोधाद् अङ्गस्य इति षष्ठ्यन्तं पञ्चम्यन्तत्वेन विपरिणम्य अदन्तादङ्गात् परस्य टादीनामिनात्स्या इत्येते आदेशाः स्युरित्यर्थः सिद्धान्तकौमुद्यां दीक्षितेन स्वीकृतः। अतः दीक्षितमते विशेषणवाचकपदानुरोधादपि विशेष्यवाचकपदस्य विभक्तिविपरिणामो दृश्यते। अतो दीक्षितमते अयमर्थः समीचीन एव।

### सूत्रे नित्यग्रहणप्रयोजनम्–

अत्र पुनरियमाशङ्का जायते यदस्मिन् सूत्रे नित्यग्रहणं किमर्थमिति? यतो हि सूत्रमिदं **हे मपरे वा** इति **मय उञो वो वा** इति च विभाषाद्वयमध्ये पठितम्। एवञ्च विभाषाद्वयमध्ये च ये विधयस्ते नित्याः भवन्ति[4] इति **पूङः क्त्वा च** इति सूत्रभाष्योक्तरीत्या **ङमो ह्रस्वादचि ङमुण्नित्यम्** इति सूत्रस्य विभाषाद्वयमध्ये पठितत्वेन नित्यार्थस्य लाभसम्भवेन पुनः सूत्रे नित्यग्रहणं व्यर्थमिति चेदुच्यते अत्र सूत्रे नित्यग्रहणं स्पष्टप्रतिपत्त्यर्थम्। तदुक्तं प्रौढमनोरमायाम्–''**नित्यग्रहणं विस्पष्टार्थम्। हे मपरे वा इति मञ उञो वो वा इति च विकल्पद्वयस्य मध्ये पाठादेव नित्यत्वलाभात्।**''[5] अत्र इदमाशङ्क्यते यद्विभाषामध्ये ये विधयः ते नित्या इति भाष्योक्तवचनप्रामाण्येन ङमो ह्रस्वादचि ङमुण्नित्यम् इति सूत्रे नित्यग्रहणाभावेऽपि नित्यत्वस्य लाभो यदि सम्भवति चेत् सूत्रे नित्यग्रहणं विस्पष्टार्थम् इति दीक्षितानां मते विभाषाद्वयमध्ये पठितत्वात् '**डः सि धुट्**', '**नपरे नः**' इत्यादिसूत्राणामपि नित्यत्वापत्तिरिति चेद् अत्रेदं बोध्यं यत् '**हे मपरे वा**' इत्यत्र भगवता पाणिनिना 'वा' ग्रहणं कृतं वर्तते। अथ च **मय उञो वो** वा इत्यत्रापि वाग्रहणं कृतम्। तत्र **हे मपरे वा** इत्यत्र वाग्रहणे स्वरितत्वप्रतिज्ञाबलादेव **मय उञो वो वा** इति सूत्रेऽपि वाग्रहणेऽनुवर्तमाने **मय**

**उञो वो वा** इति सूत्रे पुनर्वाग्रहणसामर्थ्यात् मय उञो वो वा इति सूत्रादव्यवहितपूर्वसूत्रे एव 'वा' इत्यस्यानुवृत्तेर्निवृत्तिः कल्पनीया। अन्यत्र तु निवृत्तिकल्पने प्रमाणाभावात् **'डः सि धुट्'** **'नपरे नः'** इत्यादौ वा इत्यस्य सम्बन्धः भवत्येव, अतः तेषां न नित्यत्वप्रसक्तिः।

**सूत्रोदाहरणानि–**

अस्य सूत्रस्य उदाहरणानि त्रीणि "**सन्नच्युतः, सुगण्णीशः, प्रत्यङ्ङात्मा**"[6] सिद्धान्तकौमुद्यां प्रदर्शितानि। तत्र गण संख्याने इत्यस्माद्धातोः णिचि 'सुगण इ' इति स्थितौ **अतो लोपः** इति शास्त्रेण अल्लोपे कृते सति सुष्ठु गणयति इति विग्रहे सुगणि शब्दात् क्विप्प्रत्यये कृते **णेरनिटी**त्यनेन णिलोपे च कृते क्विपः सर्वापहारिलोपे पुनः ईश इत्यनेन साकम् अन्वये कृते 'सुगण् ईश' इति स्थिते अत्र ह्रस्वादव्यवहितोत्तरत्व-विशिष्टङम्पदबोध्यः णकारः तदन्तं पदं सुगण् इति तदव्यवहितोत्तरविशिष्टाच्पदबोध्यस्य ईशघटकस्य ईकारस्य णुडागमो भवति। एवञ्च सुगण्णीश इति प्रयोगः सिद्ध्यति। अत्र इदमाशङ्क्यते यत् माथितिकः प्रत्यैषिषन् इत्यादिप्रयोगसिद्ध्यर्थम् **अचः परस्मिन् पूर्वविधौ** इत्यत्र पूर्वस्माद् विधिः पूर्वविधिरिति पञ्चमीसमासस्य आवश्यकत्वात् तस्मिन्पक्षे **अचः परस्मिन् पूर्वविधौ** इति सूत्रस्य परनिमित्तकोऽजादेशः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये इत्यर्थस्य निष्पद्यमानतया सुगण्णीश इति प्रयोगस्य सिद्धिर्न स्यात्। तथाहि सुगण् ईशः इत्यत्र परनिमित्तकोऽजादेशः अल्लोपरूपाजादेशः स स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टः ङम्पदबोध्यः णकारस्तदव्यवहितोत्तरत्वविशिष्टः ईकारः तस्य ङमुडागमः कर्तव्यः। एवञ्च **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण स्थानिवद्भावे 'सुगण् ईशः' इत्यत्र सुगण शब्दस्य ङमन्तपदत्वाभावात् तदव्यवहितोत्तरत्वविशिष्टाच्पद-बोध्यस्य ईकारस्य ङमुडागमः न स्यात् इति चेत् उच्यते **पूर्वत्रासिद्धीये न स्थानिवत्**[7] इति वार्तिकेन अत्र **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण विधीयमानस्य स्थानिवद्भावस्यात्र निषेधो भवति यतः **ङमो ह्रस्वादचि ङमुण्नित्यम्** सूत्रं त्रिपादीस्थम् एवञ्च त्रिपादीस्थे कार्ये कर्तव्ये अत्र **अचः परस्मिन् पूर्वविधौ** इत्यनेन सूत्रेण अत्र स्थानिवद्भावो न भवति। तस्माद् सुगण् इत्यस्य ङमन्तपदत्वम् अस्त्येव तदव्यवहितोत्तरविशिष्टस्य अच्पदबोध्यस्य ईशघटकस्य ईकारस्य णुडागमः सिद्ध्यत्येव। पुनरत्र आशङ्क्यते यत् पूर्वत्रासिद्धीये न स्थानिवत् इत्यस्य वार्तिकस्य निषेधकं वार्तिकं "**तस्य दोषः संयोगादिलोपलत्वणत्वेषु**"[8] इति वार्तिकस्य विद्यमानत्वात् अत्र च णत्वस्यैव विधातव्यतया णत्वकर्तव्यतायां **पूर्वत्रासिद्धीये न स्थानिवत्** इत्यस्य वार्तिकस्य निषेधात् अत्र **अचः परस्मिन् पूर्वविधौ** इत्यनेन स्थानिवद्भावः दुर्वारः एव स्यात् तर्हि अत्र उच्यते यत्

तस्य दोषः संयोगादिलत्वणत्वेषु इति वार्तिकघटकलत्वसाहचर्येण आदेशरूपस्यैव णत्वस्य ग्रहणात् प्रकृतस्थले आगमरूपस्य णत्वस्य सत्त्वात् तस्य दोषः संयोगादिलत्वणत्वेषु इत्यस्य वार्तिकस्य अप्रवृत्त्या **पूर्वत्रासिद्धीये न स्थानिवत्** इति वार्तिकस्य निषेधः न भवति। एवञ्च स्थानिवद्भावस्य निषेधे कृते सति पूर्वोक्तरूपसिद्धौ न किमपि बाधकम्। वस्तुतस्तु तस्य दोषः संयोगादिलत्वणत्वेषु इत्यस्मिन् वार्तिके यदा **सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्** इत्यस्याः परिभाषायाः प्रवृत्तिः स्यात् तदैव तस्य वार्तिकस्य अयमर्थः वक्तुं शक्यते। परन्तु **सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्** अस्याः परिभाषाया अनित्यत्वात् कथञ्चित् तस्य दोषः **संयोगादिलोपणत्वलत्वेषु** इति वार्तिके परिभाषाया अप्रवृत्तौ **पूर्वत्रासिद्धीये न स्थानिवद्** इत्यस्य वार्तिकस्य निषेधः प्रसज्येत। तथा सति प्रकृते स्थानिवद्भावस्यानिषेधात् दोषः स्यादेवेत्याकाङ्क्षायाम् उच्यते पञ्चमीसमासस्याप्य-नित्यत्वाद् सुगण् ईशः इत्यत्र अल्लोपस्य स्थानिवद्भावाभावेन न कोऽपि दोषः। पूर्वविधौ इत्यत्र पञ्चमीसमासस्य अनित्यत्वे ज्ञापकं तु **निष्ठायां सेटी**ति सूत्रे सेटिग्रहणमेव। तच्च सेट् ग्रहणं किमर्थं कृतमिति चेन्न तावद् अनिड्व्यावृत्त्यर्थं सेड्ग्रहणं कृतं यतो हि ण्यन्तस्थले सर्वेषां धातूनां अनेकाच्त्वात् **एकाच उपदेशेऽनुदात्तात्** इत्यस्य प्रवृत्त्यभावान् न कस्माच्चिद्धातोः परस्य प्रत्ययस्य अनिट्त्वं भवति तस्मात् अनिड्व्यावृत्त्यर्थं सेडिति वक्तुं न शक्यते अपितु कालावधारणार्थमेव सेड्ग्रहणं कृतम्। यतो हि यदि कालावधारणं न स्यात् तर्हि कारितः इति प्रयोगस्य सिद्धिर्न स्यात्, इटः प्राक् णिलोपश्चेत् कृ त इत्यत्र एकाच्त्वात्तदव्यवहितोत्तरत्वविशिष्टस्य निष्ठासंज्ञकस्य वलाद्यार्धधातुकस्य 'त'इत्यस्य इडागमाभावेन कारितः भावितः इत्यादिप्रयोगाणां सिद्धिर्न स्यात्। अतः कालावधारणार्थमेव सूत्रे सेट् ग्रहणं कृतम्। यदि पञ्चमीसमासः नित्यः स्यात् तर्हि सूत्रे सेड्ग्रहणं व्यर्थम्। यतो हि कालावधारणाभावेऽपि इटः प्रवृत्तेः प्राक् णिलोपे कृतेऽपि 'कृ त' इत्यवस्थायाम् अत्र परनिमित्तकोऽजादेशः णिलोपरूपः अजादेशः स स्थानिवत् स्यात् स्थानिभूतः अचः इकारः ततः पूर्वत्वेन दृष्टः 'कृ त' इति तदव्यवहितपूर्वत्वविशिष्टस्य 'त' इत्यस्य इडागमे कर्तव्ये स्थानिवद्भावः स्यात्। एवञ्च कृ इत्यस्य अनेकाच्त्वात् **एकाच उपदेशेऽनुदात्तादि**ति सूत्रस्य अप्रवृत्त्या इडागमे कृते कारितः भावितः इत्यादिप्रयोगाणां सिद्धिः स्यादेव। तथा च सूत्रे सेड्ग्रहणं व्यर्थं स्यात्। तदेव व्यर्थीभूय ज्ञापयति **पञ्चमीसमासोऽनित्य** इति। पञ्चमीसमासस्य अनित्यत्वफलं तु विगणय्य इति। तथाहि 'वि' उपसर्गात् गण संख्याने धातोः णिचि 'क्त्वा'प्रत्यये कृते सति **समासेऽनञ्पूर्वे क्त्वो ल्यप्** इति सूत्रेण ल्यबादेशे वि गण णि य इति जाते

''**ल्यपि लघुपूर्वात्**'' इति सूत्रेण अयादेशे विगणय्य इति प्रयोगः सिध्यति यदि पञ्चमीसमासः नित्यः तर्हि विगणय्य इति प्रयोगस्य सिद्धिर्न स्यात्। यतो हि 'वि गण णिच् य'' इत्यवस्थायाम् ''**अतो लोपः**'' इत्यनेन गणावयवस्य अकारस्य लोपे कृते परनिमित्तकस्य अल्लोपरूपाजादेशस्य स्थानिभूतादचः पूर्वत्वेन दृष्टो यो गकारोत्तरवर्ती अकारः तस्मात् परस्य णेः इत्यस्य अयादेशकर्तव्यतायां स्थानिवद्भावः स्यात्। एवञ्च अत्र अकारात् पूर्वः णकार एव स्यात् न तु गकारोत्तरवर्त्यकारः। अतः 'गण' लघुपूर्वत्वाभावात् तदवधिकपरत्वविशिष्टस्य णेः इत्यस्य अयादेशो न स्यात्। एवञ्च विगणय्य इति प्रयोगः न सिद्ध्येत्। तस्माद् तत्सिद्ध्यर्थं पञ्चमीसमासस्य अनित्यत्वं कल्पनीयम्। पञ्चमीसमासस्य अनित्यत्वकल्पनायान्तु अनित्यत्वादेव स्थानिवद्भावस्याप्रवृत्तौ लघुपूर्वत्वस्य सत्त्वात् अयादेशे कृते सति 'विगणय्य' इत्यादिप्रयोगाः सिद्ध्यन्त्येव। ननु 'विगणय्य' इत्यादिप्रयोगाणां सिद्ध्यर्थं पञ्चमीसमासस्य अनित्यत्वं न कल्पनीयम्। पञ्चमी-समासस्य नित्यत्वेन स्थानिवद्भावे कृतेऽपि 'वि गण णिच्' इत्यवस्थायाम् अत्र लघुपूर्वः व्यपदेशिवद्भावेन अकार एव लघुपूर्वत्वस्य 'गण' इत्यस्य सत्त्वात् तदवधिकोत्तरविशिष्टस्य णेः इत्यस्य अयादेशः सिद्ध्यति। एवञ्च विगणय्य इत्यस्य सिद्धिः स्यादेवेति चेदत्रोच्यते व्यवदेशिवद्भावेन पूर्वत्वं परत्वं च अतिदेष्टुं न शक्यते, यदि च अतिदिश्यते तथा सति दधि मधु इत्यादावपि यणादेशस्य प्रसक्तिः स्यात्। यतो हि अत्र इक्पदबोध्यः दधिशब्दावयव इकारः एवम् अच्पदबोध्यः दधिशब्दावयव इकारः, तदवधिकपूर्वत्वविशिष्टः इकारः, तस्य स्थाने यणादेशः स्यात् एवञ्च व्यपदेशिवद्भावेन पूर्वत्वं परत्वञ्च यद्यतिदिश्यते तदा अच्परकत्वाभावे दधि मधु इत्यादौ यणादेशप्रसक्त्या पूर्वत्वं परत्वञ्च व्यपदेशिवद्भावेन अतिदेष्टुं न शक्यते तस्मात् पञ्चमीसमासस्य अनित्यत्वाभावे 'विगणय्य' इति प्रयोगः न सिद्ध्येदतस्तत्सिद्ध्यर्थं पञ्चमीसमासस्य अनित्यत्वमवश्यं कल्पनीयम्। एवञ्च सुगण्णीशः इत्यत्र स्थानिवद्भावे कर्तव्ये **अचः परस्मिन् पूर्वविधौ** सूत्रं न प्रवर्तते। तस्मात् सुगण् इत्यस्य ङम्पदबोध्यस्य तदव्यवहितोत्तरत्वविशिष्ट ईकारस्य णुट् आगमः सिद्ध्यत्येव।

## अचीत्यस्य षष्ठ्यन्तत्वेन विपरिणामे बीजप्रदर्शनम्–

**ङमो ह्रस्वादचि ङमुण् नित्यम्** इत्यनेन सूत्रेण अचः ङमुडागमः विधीयते। तस्य च ङमुडागमस्य टित्त्वात् आद्यावयवः अयं ङमुडागमो भवति। किन्तु ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्य अचि परतः ङमुडागमः इत्यर्थेऽपि पदावयवस्य ह्रस्वाव्यवहितोत्तरत्वविशिष्टस्य ङमो ङमुडागमविधानेऽपि कुर्वन्नास्ते इत्यादिप्रयोगाणां सिद्धिर्भवत्येव।

तर्हि किमर्थम् अचि इति सप्तम्यन्तस्य षष्ठ्यन्तत्वेन विपरिणामं कृत्वा परस्य आद्यवयवः अयं ङमुडागमः विधीयते इत्याकाङ्क्षायामुच्यते यत् परस्य आद्यवयवः ङमुडागमः न स्यात् तर्हि कुर्वन्नास्ते इत्यादौ पदान्तस्य इत्यनेन सूत्रेण णत्वनिषेधः न स्यात्। यतो हि कुर्वन्नास्ते इत्यादौ पदान्तः वर्तते चरमनकारः, तस्य **अट्कुप्वाङ्नुम्व्यवायेऽपि** इत्यनेन प्राप्तणत्वस्य निषेधेऽपि पूर्वणकारस्य णत्वनिषेधो न स्यात् तस्य पदान्तत्वाभावाद्। अतः अत्र परस्यैव आद्यावयवः अनेन सूत्रेण बोध्यते। तथा सति कुर्वन् इत्यत्र नकारस्य पदान्तत्वेन णत्वनिषेधः सिद्ध्यति। उत्तरस्य तु णत्वस्य प्राप्तिरेव नास्ति, तस्य समानपदस्थत्वाभावात्। अतः कुर्वन्नास्ते इत्यादौ णत्वनिषेधः सिद्ध्यति। अत्रोच्यते–कुर्वन्नास्ते इत्यादौ णत्वनिषेधार्थं परस्य आद्यवयवत्वं नापेक्षितं, यतो हि **यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते**[9] इत्यनया परिभाषया आगमानाम् आगमिधर्मवैशिष्ट्यमपि बोध्यते। एवञ्च यदि ङमः एव ङमुडागमः क्रियते चेत् आगमी वर्तते कुर्वन्नास्ते इत्यत्र नकारः आगमिवृत्तिधर्मः, पदान्तत्वं तस्य आगममात्रे इत्युक्ते नकारे अतिदेशेन उभयोर्नकारयोर्णत्वनिषेधः सिद्ध्यति। तर्हि परस्य आद्यवयत्वं किमर्थं स्वीकृतमिति चेदुच्यते यत् **ङमो ह्रस्वादचि ङमुण्नित्यम्** इति सूत्रभाष्ये ङम एव ङमुडागमः इत्यर्थे कुर्वन्नास्ते इत्यादौ भाष्ये दोषः उद्भावितः तादृशदोषोद्भावनपरकभाष्यप्रामाण्येन **ङमो ह्रस्वादचि ङमुट्** इत्येतत्सूत्रघटकस्य अचि इत्यस्य षष्ठ्यन्तत्वेन विपरिणामं कृत्वा अर्थः उपपादनीयः। तथा च भाष्यप्रामाण्याद् अच एव ङमुडागमः विधीयते। अत एव मनोरमाकारेण उक्तम् –''**ङमुटः परादित्वं कुर्वन्नास्ते इत्यत्र णत्वप्रतिषेधार्थम्। अत एव ङमो ह्रस्वादचि द्वे नासूत्रि।**''[10]

अयं भावः–कुर्वन्नास्ते इत्यत्र णत्वप्रतिषेधार्थमेव **ङमो ह्रस्वादचि ङमुट् नित्यम्** इत्यस्य सूत्रस्य स्थाने ङमो ह्रस्वादचि द्वे इति सूत्रं भगवता पाणिनिना न कृतम्। अन्यथा ङमो द्वित्वविधानेनापि अचि परतः कुर्वन्नास्ते सन्नच्युतः सुगण्णीशः इत्यादिप्रयोगाणां सिद्धौ सत्यामपि कुर्वन्नास्ते इत्यादौ णत्वनिषेधो न स्यात्। यतः परं णत्वं प्रति पूर्वस्य सिद्धतया **अट्कुप्वाङ्नुम्व्यवायेऽपि** इत्यनेन सूत्रेण णत्वापत्तेर्दुष्परिहर्तव्यतया दोषः स्यादेव। अत्र प्राचीनाः ऊचुः यद् **असिद्धं बहिरङ्गमन्तरङ्गे** इत्यनया परिभाषया गतार्थत्वात् द्वयमपि असङ्गतम्। अर्थात् ङमुटः परादित्वं कुर्वन्नास्ते इत्यादौ णत्वप्रतिषेधार्थम् एवञ्च **ङमो ह्रस्वादचि द्वे** इति सूत्रकरणे कुर्वन्नास्ते इत्यादौ णत्वापत्तिः स्यात्। आपत्तिद्वयमपि **असिद्धं बहिरङ्गमन्तरङ्गे** इत्यनया परिभाषया परिहर्तुं शक्यते। तथा प्राचीनैः यत् समाधानं प्रदत्तं तदसङ्गतं दीक्षितेभ्यः न रोचते। यतो हि प्राचीनानां यत् समाधानं वर्तते तत् कार्यकालपक्षाभिप्रायेण यतो हि राज्ञः इत्यत्र यथोद्देशे त्रैपादिके अन्तरङ्गपरिभाषा न प्रवर्तते इत्यस्य स्वयमेव उक्तत्वेन प्राचीनैः यत् समाधानं प्रदत्तं तत् पाक्षिकमेव प्रतिभाति।

**दीक्षितोक्तसूत्रार्थे दोषोद्भावनं तत्समाधानञ्च—**

दीक्षितमते **ङमो ह्रस्वादचि ङमुट्** नित्यमिति सूत्रस्य ह्रस्वात् परो ङम् तदन्तं यत् पदं तदव्यवहितोत्तरविशिष्टस्य अचः नित्यं ङमुडागमः स्यात् अयम् अर्थः सम्पद्यते। परन्तु दीक्षितोक्तार्थस्वीकारे परमदण्डिनौ परमदण्डिना इत्यादौ ङमुडागमापत्तिः स्यात्। तथाहि परमश्चासौ दण्डी परमदण्डी तौ परमदण्डिनौ अत्र परमदण्डिन् औ इत्यवस्थायां समासे लुप्यमानायाः विभक्तेः **प्रत्ययलोपे प्रत्ययलक्षणम्** इत्यनेन सूत्रेण स्थानिवद्भावात् अन्तर्वर्तिनीं विभक्तिमाश्रित्य दण्डिन् इत्यस्य पदत्वात् ह्रस्वाव्यवहितोत्तरत्वविशिष्टः यो ङम् इत्युक्ते दण्डिन्घटकनकारः तदन्तं पदं दण्डिन् इति पदं तदव्यवहितोत्तरविशिष्टस्य अचः औकारस्य नुडागमः स्यात्। एवञ्च परमदण्डिनौ इति रूपं न सिद्ध्येत्। अपितु नकारद्वयघटितमेव रूपं सिद्ध्येत्। अतः परमदण्डिनौ परमदण्डिना इत्यादौ दोषवारणार्थं श्रीमता भट्टोजिदीक्षितेन अत्र **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकस्य प्रवृत्तिः कारिता। अनेन च वार्तिकेन प्रत्ययलोपे प्रत्ययलक्षणम् इत्यस्य सूत्रस्य निषेधः क्रियते। तेन अन्तर्वर्तिनी विभक्तिमाश्रित्य दण्डिन् इत्यस्य पदत्वं वक्तुं न शक्यं तस्मात् परमदण्डिनौ परमदण्डिना इत्यादौ न ङमुडागमः। ननु **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकस्य कीदृशोऽर्थः स्वीकृतः येन स्वीकृतार्थेन ङमुडागमकर्तव्यतायां **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रस्य निषेधः सिद्ध्येत् इति चेत् उच्यते अपदादिविधौ उत्तरपदस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षण**मिति सूत्रं न प्रवर्तते अयमेव वार्तिकार्थः। तथा च **ङमो ह्रस्वादचि ङमुण्नित्यम्** इत्यनेन सूत्रेण विधीयमानः यः ङमुडागमः सः पदादिविधिर्नास्ति। अतः अस्य ङमुडागमस्य अपदादिविधित्वात् अपदादिविधौ इत्युक्ते ङमुडागमविधौ उत्तरपदस्य दण्डिन् इत्यस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रं न प्रवर्तते।

**वार्तिकस्वीकारस्यावश्यकता—**

एतद्वार्तिकस्वीकारादेव परमवाचौ इत्यत्र **चोः कुः** इति सूत्रेण कुत्वं न भवति। अन्यथा परमा चासौ वाक् च तौ परमवाचौ अत्र परमवाच् औ इत्यवस्थायां चवर्गस्य कवर्गान्तादेशः स्यात्, पदान्ते इत्यर्थकेन **चोः कुः** इति सूत्रेण वाच्घटकचकारस्य स्थाने ककारः स्यात्। यतो हि अत्रापि परमवाचौ इत्यत्र कर्मधारयसमाससत्त्वात् समासे वाच्शब्दोत्तरम् उच्यमानायाः विभक्तेः **प्रत्ययलोपे प्रत्ययलक्षणम्** इत्यनेन सूत्रेण स्थानिवद्भावाद्वाच् इत्यस्य पदत्वेन पदान्ते स्थितस्य **चोः कुः** इति सूत्रेण कवर्गान्तादेशः स्यादेव परमवाचौ परमवाचा इत्यादिप्रयोगाणां सिद्धिर्न स्यात्। यदि वार्तिकमिदं स्वीक्रियते तथा सति **चोः कुः** इत्यनेन सूत्रेण विधीयमानः कर्वगान्तादेशः पदान्तविधिर्वर्तते न तु पदादिविधिः।

अतः अपदादिविधौ चोः कुः इत्यनेन सूत्रेण विधीयमाने कुत्वविधौ उत्तरपदस्य 'वाच्' इत्यस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रं न प्रवर्तते तथा च 'वाच्' इत्यस्य पदत्वाभावात् चोः कुः इत्यनेन सूत्रेण कुत्वं न भवति इति वार्तिकस्वीकारस्य एकं प्रयोजनं द्वितीयन्तु परमश्चासौ गोधुक् च तौ परमगोदुहौ। अत्र अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वात् दादेर्धातोर्घः इत्यनने सूत्रेण हकारस्य स्थाने घत्वापत्तिः स्यात्। तथा च परमगोदुहौ परमगोदुहा परमगोदुहे इत्यादिप्रयोगाणां सिद्धिर्न स्यात्। अनेन च वार्तिकेन उत्तरपदस्य गोदुह् इत्यस्य पदत्वे कर्तव्ये प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रं प्रतिषिध्यते। अतः गोदुह् इत्यस्य पदत्वाभावात् दादेर्धातोर्घः इत्यनेन सूत्रेण घत्वं न प्रवर्तते इति द्वितीयं प्रयोजनम्। तृतीयं प्रयोजनं तु परमलिहौ परमश्चासौ लिट् च इति परमलिह् तौ परमलिहौ अत्रापि अन्तर्वर्तिनीं विभक्तिमाश्रित्य लिह् इत्यत्य पदत्वात् धात्ववयवस्य हस्य ढः स्यात् इत्यर्थकेन **हो ढः** इति सूत्रेण ढत्वं प्राप्तं तदपि न भवति। यतो हि **उत्तरपदत्वे चापदादिविधौ** इत्यनेन वार्तिकेन लिह् इत्यस्य उत्तरपदस्य पदत्वकर्तव्यतायां **प्रत्ययलोपे प्रत्ययलक्षणम्** इत्यस्य निषेधात् 'परमलिह् औ' घटकलिहित्यस्य पदत्वाभावात् 'हो ढः' इति सूत्रस्य प्रवृत्तिः न भवति। तेन च परमलिहौ इत्यत्र हो ढः इति सूत्रेण ढत्वं न भवति इति तृतीयं प्रयोजनम्। एवमेव वार्तिकस्वीकारस्य नैकानि प्रयोजनानि सन्ति, तदत्र दिङ्मात्रम् उदाहृतम्। तदुक्तं श्रीमता भट्टोजिदीक्षितेन प्रौढमनोरमायाम्–"**ननु परमदण्डिनौ इत्यादौ अन्तर्वर्तिविभक्त्या पदत्वात् नुट् स्यात् इति चेत् न उत्तरपदत्वे चापदादिविधौ इति प्रत्ययलक्षणप्रतिषेधात् अत एव परमवाचौ परमगोहौ परमलिहौ इत्यत्र कुत्वढत्वघत्वादीनि न।**"[11]

**प्राचीनोपदर्शितोपायखण्डनम्–**

अथ च परमदण्डिनौ इत्यत्र ङमुडागमवारणोपायः प्राचीनैः यः प्रदर्शितः सोऽपि भट्टोजिदीक्षितेन प्रौढमनोरमायां खण्डितः। तथाहि परमदण्डिनौ इत्यादौ दोषवारणाय प्राचीनैः प्रक्रियाकौमुदीकारादिभिः **उञि च पदे** इत्यस्मात् सूत्रात् मण्डूकप्लुत्या अत्र सूत्रे पदे इत्यस्य अनुवृत्तिः क्रियते। एवञ्च अचीत्यस्य सप्तम्यन्तत्वेन पदे अभेदेन विशेषणत्वाच्च अभेदसम्बन्धावच्छिन्नविशेषणताबोधकं यत् सप्तम्यन्तं पदं तत् तदादेर्बोधकं न तु तदन्तस्य इत्यर्थिकया **यस्मिन्विधिस्तदादावल्ग्रहणे** इत्यनया परिभाषया तदादिविधौ सति ह्रस्वात् परो यो ङम् तदन्तं यत् पदं तदव्यवहितोत्तरत्वविशिष्टस्य अजादेः पदस्य ङमुडागमः स्यात् अयमर्थः सूत्रस्य निष्पद्यते। एवञ्च परमदण्डिनौ इत्यादौ **प्रत्ययलोपे प्रत्ययलक्षणम्** इत्यनेन सूत्रेण 'दण्डिन्' इत्यस्य पदत्वेऽपि औच् इत्यस्य अजादिपदत्वाभावात् ङमो

ह्रस्वादचि ङमुट् नित्यम् इति सूत्रेण न ङमुडागमापत्तिः। यतो हि ह्रस्वात्परो यो ङम् इत्युक्ते ह्रस्वः दण्डिन्घटकः डकारोत्तरवर्ती इकारः तदव्यवहितोत्तरत्वविशिष्टो यो ङम्पद-बोध्यः नकारः तदन्तं पदम् अन्तर्वर्तिनीं विभक्तिमाश्रित्य दण्डिन् इति तदव्यवहितोत्तरत्व-विशिष्टः औकारः वर्तते सः औकारः अजादिपदसञ्ज्ञको नास्ति, अतः परमदण्डिनौ इत्यादौ न ङमुडागमापत्तिः। अत्र परमदण्डिनौ इत्यत्र दोषवारणार्थम् **उत्तरपदत्वे चापदादिविधौ** वार्तिकस्य प्रवृत्तिः न कार्या इति प्राचीनानामाशयः। एतत्प्राचीनमतं दीक्षितेन मनोरमायां खण्डितम्। प्राचीनमतं खण्डयतो दीक्षितस्य अयमभिप्रायः यद्– **उञि च पदे** इत्यस्मात् सूत्रात् पदे इत्यनुवर्त्य तदादिविधौ अजादेः पदस्य ङमुडागमविधानेन परमदण्डिनौ इत्यत्र ङमुडागमाभावः यद्यपि साधयितुं शक्यते तथापि यदि वार्तिकेन प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रस्य निषेधः न क्रियते तथा सति परमदण्डिनौ इत्यत्रैव अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदसञ्ज्ञकत्वात् प्रातिपादिकसञ्ज्ञकं यत् पदं तदन्तस्य नस्य लोपः स्यात् इत्यर्थकेन नलोपः प्रातिपदिकान्तस्य इत्यनेन सूत्रेण नलोपः प्राप्तः। अतः तं प्राप्तं नलोपं वारयितुम् **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकेन **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रस्य अवश्यं निषेधो वाच्यः। निषेधे सति दण्डिन्नित्यस्य पदत्वाभावात् नलोपः वारितो भवति। एवञ्च यथा दण्डिन् इत्यस्य पदत्वाभावाय **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकस्य प्रवृत्तिं स्वीकृत्य नलोपः वार्यते तथा तेनैव वार्तिकेन पदत्वनिषेधेन ङमुडागमाभावोऽपि सिद्धः। एवञ्च एकेनैव यत्नेन ङमुडागमाभावस्य नलोपाभावस्य च सिद्धत्वात् नलोपाभावाय वार्तिकप्रवृत्तेः ङमुडागमाभावाय **उञि च पदे** इत्यस्मात् सूत्रात् मण्डूकप्लुत्या पदे इत्यनुवृत्तिश्चेति यत्नद्वयम् अनावश्यकमेव।

**हरिदीक्षितमतेन सूत्रार्थविचारः**

**ङमो ह्रस्वादचि ङमुण् नित्यम्** इति सूत्रविषये श्रीमता हरिदीक्षितेन इदं विचारितं यत् ङमः इति षष्ठ्यन्तमेवास्तु। तथा सति अत्र अनुवर्तमानस्य पदस्य विभक्तिविपरिणामो न भवति इति लाघवम्। एवम् अचि इति सप्तमी अपि चरितार्था, अतः ङम इत्यस्य षष्ठ्यन्तत्वम् अचि इत्यस्य सप्तम्यन्तत्वमेव स्वीकृत्य अर्थोऽस्तु। तथा सति सूत्रार्थः इत्थं सम्पद्यते–ह्रस्वात्परस्य पदावयवस्य ङमः अचि परे ङमुट् आगमः स्यात्। एवञ्च सन्नच्युतः इत्यादिप्रयोगाः सुतरां सिद्ध्यन्ति। किन्तु एवमर्थस्वीकारे दण्डिना इत्यादौ ङमुडागमापत्तिः, यतो हि अत्र पदं वर्तते दण्डिना इति पदघटकः अच्पदबोध्यः डकारोत्तरवर्ती इकारः तदव्यवहितोत्तरत्वविशिष्टः ङम्पदबोध्यः नकारः तस्य नुडागमः स्यात् आकाररूपाचि परतः। यदि अत्र दोषवारणाय **उञि च पदे** इत्यस्मात् सूत्रात् मण्डूकप्लुत्या पदे

इत्यनुवर्त्यते तत्र च अचि इत्यस्य विशेषणत्वं स्वीक्रियते। तथा सति ह्रस्वाव्यवहितपरत्वविशिष्टः यः पदावयवः ङम् तस्य ङमुडागमः स्यात् अजादौ पदे इति सूत्रार्थस्य निष्पद्यमानतया दण्डिना इत्यत्र दोषः परिहर्तुं शक्यते। यतो हि अत्र ह्रस्वाव्यवहितपरत्वविशिष्टस्य ङम्पदबोध्यस्य दण्डिन्घटकनकारस्य पदावयवत्वेऽपि आकारस्य अजादिपदत्वाभावेन न ङमुडागमापत्तिः। किन्तु तथार्थस्वीकारे नन्दनानन् इत्यत्र दोषः स्यात्। यतो हि टुनदि समृद्धौ इत्यस्मात् धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इत्यनेन सूत्रेण नन्दयति इति नन्दनः इति विग्रहे ल्युट्प्रत्यये कृते नन्दनशब्दो निष्पद्यते तस्य च अन्प्रकृतिकशत्रन्तानन्शब्देन सह कर्मधारयसमासे नन्दनश्च अनन् च इति नन्दनानन् इति रूपं सिद्ध्यति। अत्र ङमन्तं पदमेकदेशविकृतन्यायेन नन्दन् इति परादिवद्भावेन अजादिपदत्वम् आनन् इत्यस्य वर्तते इति तस्मिन् परतः ङमन्तपदावयवस्य ङमो नकारस्य ङमुडागमः स्यात्। यद्यपि अयं दोषः दीक्षितमतेऽपि तदवस्थः एव। यतो हि दीक्षितमते पूर्वोक्तरीत्या सूत्रार्थः प्रतिपादितः। नन्दन इत्यत्र दकारोत्तरवर्ती अकारः ह्रस्वपदबोध्यः तदव्यवहितोत्तरत्वविशिष्टो यो ङम् नकारः तदन्तं पदं नन्दन् इति पदं तदव्यवहितोत्तरत्वविशिष्टाचः अकारः तस्य ङमुडागमः स्यात्। एवञ्च दीक्षितमतेऽपि अत्र दोषः अस्त्येव। यदि अत्र दोषवारणाय पदस्य इत्येतद् पदपदार्थे ङमन्ते पदे इत्येतद् पदार्थनिमित्तकपदत्वमतभेदोऽपि विवक्षितः इत्युच्यते तदा हरिदीक्षितमते दीक्षितमते च न दोषः इति हरिदीक्षिताभिप्रायः। किञ्च परमदण्डिनौ इत्यत्र ङमुड्वारणोपायः यः भट्टोजिदीक्षितेन प्रदर्शितः तदुपायः हरिदीक्षितेभ्यः न रोचते। तत्र रत्नकारः ब्रवीति यत् **उत्तरपदत्वे चापदादिविधौ** इत्येतद्वार्तिकघटकापदादिविधिशब्दः समस्तः। अत्र नञ्समासो वर्तते। स च लाघवात् पर्युदासः एव स्यात्। एवञ्च पदादिविधिभिन्नपदादिविधिसदृशविधौ उत्तरपदस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रं न प्रवर्तते इति वार्तिकस्य अर्थः स्यात्। अयं भावः पदादिविधिश्च पदादित्वनिमित्तक इति तत्सादृश्यात् तद्भिन्ने तत्सदृशे विधौ उत्तरपदस्य पदत्वे कर्तव्ये प्रत्ययलोपे प्रत्ययलक्षणं न भवति। तत्र सादृश्यञ्च पदविशिष्टधर्मावच्छिन्ननिमित्तकत्वेन वैशिष्ट्यञ्च स्वघटकवृत्तित्वस्वघटकाव्यवहितोत्तरत्वाभाववत्सामानाधिकरण्योभयसम्बन्धेन।

पदादित्वे पदघटकाव्यवहितपूर्वत्वसामानाधिकरण्येऽपि स्वघटकाव्यवहितोत्तरत्वसामानाधिकरण्यं नास्ति। पदान्तत्वे पदघटकाव्यवहितोत्तरत्वसामानाधिकरण्यस्य सत्त्वेऽपि स्वघटकाव्यवहितपूर्वत्व–सामानाधिकरण्यं नास्ति इति **एकसत्त्वे द्वयन्नास्ति** इति न्यायेन उभयं नास्ति इति रीत्या उभयत्र उभयाभाव–सामानाधिकरण्यं समागतम्। अतः अत्र लाघवात् पर्युदास एव स्यात् किन्तु पदादिविधिभिन्न–पदादिविधिसदृशविधिः पदान्तविधिः। अतः **ङमो ह्रस्वादचि ङमुण्नित्यम्** इत्यनेन सूत्रेण विधीयमानस्य ङमुडागमस्य

पदान्तविधित्वाभावात् अत्र वार्तिकस्य प्रवृत्तिः न स्यात्। किञ्च यदि उच्यते यत् पदादिविधिभिन्नः पदादिविधिसदृशविधिः यथा पदान्तविधिः तद्वत् वर्णोद्देश्यकविधिरपि भवति तथा च ङमो ह्रस्वादचि ङमुट् नित्यम् इत्यनेन सूत्रेण विधीयमानस्य ङमुडागमस्य पदान्तविधित्वा-भावेऽपि वर्णोद्देश्यकविधित्वात् अत्र वार्तिकस्य प्रवृत्तिः भवत्येव, अतः अत्र न दोषः। किन्तु अपदादिविधौ इत्यत्र पर्युदासस्वीकारे शब्दरत्नग्रन्थविरोधः स्यात्। यतो हि रत्नकृता माषकुम्भवापेन इत्यत्र पदव्यवायेऽपि इत्यनेन सूत्रेण णत्वनिषेधार्थम् उत्तरपदस्य कार्यित्वे एव **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रं न प्रवर्तते इत्युक्तम्। अर्थात् उत्तरपदत्वे कार्यित्वनिवेशः कृतः तन्न सङ्गच्छते। यतो हि माषकुम्भवापेनेत्यत्र**प्रातिपदिकान्तनुम्विभक्तिषु** च इत्यनेन सूत्रेण विधीयमानस्य णत्वस्य पदव्यवायेऽपि इति सूत्रेण णत्वनिषेधसिद्ध्यर्थम् उत्तरपदत्वे कार्यित्वनिवेशः कृतः। यदि च अपदादिविधौ इत्यत्र पर्युदासः स्वीक्रियते तथा सति पदान्तत्वनिमित्तकविधौ एव उत्तरपदस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षणं** न प्रवर्तते इत्ययमर्थः स्यात्। तथा च **प्रातिपदिकान्तनुम्विभक्तिषु** च इत्यनेन सूत्रेण विधीयमानस्य णत्वस्य पदान्तत्वनिमित्तकत्वाभावेन वार्तिकस्य अप्रवृत्त्या **प्रत्ययलोपे प्रत्ययलक्षणम्** इत्यनेन कुम्भशब्दस्य पदत्वात् पदान्तत्वनिमित्तकत्वाभावेन वार्तिकस्य प्रवृत्त्या प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन कुम्भशब्दस्य पदत्वात् तद्व्यवाये पदव्यवायेऽपि इति सूत्रेण णत्वनिषेधः स्यात् एवेति णत्वनिषेधार्थं रत्नकृता यत् कार्यित्वनिवेशः कृतः सः व्यर्थः स्यात्। अतः अत्र अपदादिविधौ इत्यत्र पदादिविधिभिन्नः पदादिविधिसदृशः अर्थात् पदान्तविधौ एवञ्च उत्तरपदस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रं न प्रवर्तते एवमर्थः वक्तुं न शक्यते। किञ्च यदि अपदादिविधौ इत्यस्य पदान्तविधौ अयमेवार्थः अभीष्टः स्यात् तर्हि उत्तरपदत्वे च पदान्तविधौ इति वार्तिककृता इदमेव वार्तिकमुक्तं स्यात्। अस्मिन् वार्तिके च पूर्ववार्तिकापेक्षया लाघवमपि भवति तत्र समासस्य पदव्यवायस्य च ग्रहणं न कर्तव्यम्। किञ्च मात्राकृतलाघवमपि अस्ति, अतः पर्युदासस्वीकारे **उत्तरपदत्वे चापदादिविधौ** इत्यस्य स्थाने उत्तरपदत्वे च पदान्तविधौ इति वार्तिकमेव विरचितं स्यात्। तथा न कृतं तेन ज्ञायते यद् अत्र पर्युदासः रत्नकारस्य अभीष्टः अपितु पदान्तविधिभिन्ने विधौ उत्तरपदस्य पदत्वे कर्तव्ये **प्रत्ययलोपे प्रत्ययलक्षण**मिति सूत्रंन प्रवर्तते इत्येवार्थोऽभिप्रेतः। पदादिविधिभिन्नविधिः यथा पदान्तविधिः तद्वत् वर्णोद्देश्यकविधिरपि भवति इति कृत्वा अत्र माषकुम्भवापेन इत्यत्र प्रातिपदिकान्तनुम्विभक्तिषु च इत्यनेन सूत्रेण विधीयमानस्य णत्वस्य वर्णनिमित्तकत्वेन वर्णोद्देश्यकत्वेन अत्र प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेण लुप्यमानप्रत्ययस्य स्थानिवद्भावे कर्तव्ये **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकस्य प्रवृत्तिः स्यात्। तस्य प्रवृत्तिर्मा भूत् इत्यतः रत्नकारेण उत्तरपदे कार्यित्वनिवेशः कृतः। एवञ्च अत्र उत्तरपदस्य

माषशब्दस्य कार्यित्वाभावात् **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकस्य प्रवृत्तिर्न भवति। तेन **प्रत्ययलोपे प्रत्ययलक्षण**मिति सूत्रस्य निषेधाभावात् लुप्यमानविभक्तेः स्थानिवद्भावसत्त्वात् कुम्भशब्दस्य पदत्वेन पदव्यवायेऽपि इति णत्वनिषेधः सिद्ध्यति। अत्र परमपदण्डिनौ इत्यत्र**उत्तरपदत्वे चापदादिविधौ** इति वार्तिकेन तु निर्वाहः भवितुं नार्हति। यतो हि परमदण्डिनौ इत्यत्र उत्तरपदं दण्डिन् इति तस्य कार्यित्वं नास्ति। अतः कार्यित्वाभावात् उत्तरपदस्य दण्डिन् इत्यस्य पदत्वं स्यादेव। अतः दीक्षितमते ङमुडागमापत्तिः तदवस्था। किञ्च नलोपः प्रातिपदिकान्तस्य इत्यनेन सूत्रेण नलोपकर्तव्यतायां तु उत्तरपदत्वे चापदादिविधौ इति वार्तिकस्य प्रवृत्तिः भवत्येव। यतो हि **नलोपः प्रातिपदिकान्तस्य** इत्यनेन सूत्रेण यः नलोपः क्रियते परमदण्डिना इत्यत्र यः नलोपः क्रियते सः नलोपः उत्तरपदसम्बन्धी एव वर्तते। एवञ्च परम्परया उत्तरपदस्य दण्डिन् इत्यस्य कार्यित्वमस्त्येव अतः कार्यित्वविशिष्टस्य उत्तरपदस्य दण्डिन् इत्यस्य पदत्वे कर्तव्ये प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रस्य प्रवृत्तिः न स्यात्। अतः नलोपकर्तव्यतायां वार्तिकस्य प्रवृत्तिर्भविष्यति। ङमुडागमकर्तव्यतायां वार्तिकस्य प्रवृत्तिर्न भविष्यति इति कृत्वा परमदिण्डनौ इत्यत्र दोषः तदवस्थ एव। तस्मात् प्राचीनैः परमदण्डिना इत्यत्र दोषवारणार्थम् **उञि च पदे** इत्यस्मात् सूत्रात् मण्डूकप्लुत्या पदे इत्यनुवर्त्य तस्य अपि इत्यस्य विशेषणतासम्बन्धेन अन्वयात् **यस्मिन्विधिस्तदादा-वल्ग्रहणे** इत्यनया परिभाषया तदादिविधौ ह्रस्वात् परो यो ङम् तदन्तं यत् पदम् अजादेः पदस्य नित्यं ङमुडागमः अयमर्थः स्वीकृतः। स्वीकृतार्थेन च परमदण्डिनौ परमदण्डिना इत्यत्र दोषः वारितः। सः उपायः सम्यगेव प्रतिभाति।

### शेखरकाराणां मतम्—

ङमो ह्रस्वादचि ङमुट् नित्यम् इति सूत्रविषये नागेशः स्वमतमुपस्थापयन् लघुशब्देन्दुशेखरे उद्द्योतग्रन्थे च प्रथमं दीक्षितमतमनूद्य तदनन्तरं वस्तुतस्तु इत्यादिना स्वमतं प्रतिपादितवान्। तथाहि पूर्वम् अस्माभिः सम्यक् विवेचितं यत् दीक्षितेन ह्रस्वात् परो यो ङम् तदन्तं यत् पदं तस्मात् परस्य अचः नित्यं ङमुडागमः स्यात् इत्ययमर्थः स्वीकृतः। तत्र अमुमर्थं स्वीकुर्वतां भट्टोजिदीक्षितानां कोऽभिप्रायः इत्यत्र भट्टनागेशः ब्रवीति यत् **ङमो ह्रस्वादचि ङमुण् नित्यम्** इति सूत्रे पदस्य इत्येतत्सूत्रम् अधिक्रियमाणमस्ति। तच्च ङमिति पञ्चम्यन्तपदसामानाधिकरण्यानुरोधात् पञ्चम्यन्तत्वेन विपरिणम्यते। अथवा ङम्पदार्थेन साकं पदपदार्थस्य अभेदसम्बन्धेन अन्वयः। एवञ्च अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकं पदं तदन्तस्य सञ्ज्ञा इत्यर्थकेन येन विधिस्तदन्तस्य इत्यनेन सूत्रेण तदन्तविधौ ङमन्तं यत् पदम् इत्ययमर्थो लभ्यते। तत्र पदार्थविवेचनक्रमः दीक्षितस्य कः इति चेत् तत्र ह्रस्वपदबोध्यस्य

स्वाव्यवहितोत्तरत्वसम्बन्धेन ङम्पदार्थे अन्वयः पुनः ङम्पदार्थस्य पदपदार्थे अभेदसम्बन्धेन अन्वयः। अतः ह्रस्वात्परो यो ङम् तदन्तं यत्पदम् इत्यस्मात् दीक्षितः तत्र सकृदुच्चरितेन पदेन प्रतिपादितार्थस्य अन्येन केनचित् एकेनैव पदार्थेन तत्कालावच्छेदेन अन्वयो भवति, न तु अन्यान्यपदार्थेन साकम्। अधुना अयं ङम्पदार्थः ह्रस्वपदार्थेन साकमन्वेति पदपदार्थेन साकमपि अन्वेति तर्हि एकस्य ङम्पदार्थस्य अन्यान्यपदार्थेन साकं युगपत् अन्वयः कथं सङ्गच्छते इत्याकाङ्क्षायां लघुशब्देन्दुशेखरे भट्टनागेशेन उक्तं यत् "**तत्र ङम् स्वयं ह्रस्वादिति विशेषणसम्बन्धमनुभूय पदविशेषणत्वेन तदन्तपरः इति भावः**"[12] अस्य शेखरग्रन्थस्य अयमभिप्रायः पूर्वं ह्रस्वपदबोध्यस्य पदार्थस्य ङम्पदार्थे अन्वयो जातः तदनन्तरं ङम्पदार्थस्य अन्यकालावच्छेदेन पदपदार्थे अन्वयोऽस्ति। अतः एककालावच्छेदेन च एकपदार्थस्य एकस्मिन् पदार्थे एव अन्वयः इति नियमविरोधो नास्ति। अत्र अन्यकालावच्छेदेन ह्रस्वपदार्थस्य पदपदार्थेऽन्वयस्वीकाराद् अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वं ङम्पदार्थस्य वरीवर्त्येव। अतः दीक्षितेन यः अर्थः उपपादितः सः अर्थः सङ्गत एव। अत्र ङमिति पञ्चम्यन्तं पदं वर्तते। तदनुरोधात् **उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्** इत्यनया परिभाषया पञ्चमीनिर्देशस्य बलवत्त्वबोधनात् अचि इति सप्तमी षष्ठ्यर्थे वर्तते इति लाघवात् प्रागपि मया दीक्षितमत-प्रदर्शनावसरे प्रतिपादितम्। तत्र ङमः इति पञ्चम्यन्तमेव पदमस्ति षष्ठ्यन्तं नास्ति इत्यत्र किं मानम् इत्याकाङ्क्षायाम् उच्यते **तस्मिन्निति निर्दिष्टे पूर्वस्य** इति सूत्रभाष्ये भगवता भाष्यकृता ङमः परस्य अचः ङमुडागमः इत्ययमर्थः स्वीकृतः। अनेन भाष्यप्रामाण्येनैव ङमः इत्यस्य पञ्चम्यन्तत्वं स्वीकर्तव्यम्। तत्र यदि अस्मिन् सूत्रे पदस्य नाधिकृतं स्यात् तर्हि ह्रस्वात् परो यो ङम् तस्मात् परस्य अचः ङमुडागमः इत्ययमर्थः स्यात्। तथा च अदादिगणे पठिताद् अन्धातोः तिप्प्रत्यये कृते अनिति रूपम्। अत्र ह्रस्वपदबोध्यः अकारः तदव्यवहितोत्तरविशिष्टः ङम्पदबोध्यः नकारः तदव्यवहितपरत्व-विशिष्टाच्पदबोध्यः इतिशब्दघटकः तस्यापि नुट् आगमः प्रसज्येत। अतः पदस्य इत्यस्य अत्र सूत्रे अवश्यमधिकारः कर्तव्यः। तथा च अन इत्यस्य पदत्वेऽपि ङमन्तपदत्वाभावात् न ङमुडागमः इति दीक्षिताभिप्रेतार्थं प्रतिपाद्य शेखरकारः ब्रवीति यद् अधिक्रियमाणस्य विभक्तिविपरिणामं कृत्वा पदादित्यनेन सामानाधिकरण्यानुरोधात् यदर्थवर्णनं कृतं, तन्न समीचीनं, यतो हि तथार्थकरणे अर्थात् विभक्तिविपरिणामे गौरवं वर्तते। अतः गौरवभिया विभक्तिविपरिणामो न युक्तः अपितु ङमः इति षष्ठ्यन्तमेव अस्तु पदस्य इत्यपि षष्ठ्यन्तमेव अस्तु। एवञ्च ह्रस्वात्परः पदावयवः यः ङम् तस्मात्परस्य अचः ङमुडागमः अयमेव अर्थोऽस्तु। तावतापि सकलेष्टसिद्धिः सम्भवति। तथाहि सुगण्णीशः इत्यत्र ह्रस्वात् परः पदावयवः ङम् णकारः तदव्यवहितोत्तरत्वविशिष्टः अच् अकारः तस्य णुडागमनेन

सुगण्णीशः इति प्रयोगः सिद्ध्यति परन्तु तथा अर्थस्वीकारे अनिति इत्यत्र नुडागमापत्तिः। तथाहि पदमस्ति अनिति पदावयवः यः ङम् पदबोध्यः नकारः सः ह्रस्वाव्यवहितोत्तरत्व-विशिष्टोऽपि अस्ति अतः तस्मात् परस्य अचः अकारस्य ङमुडागमः स्यात् अतः ङमित्यस्य षष्ठ्यन्तत्वे भाष्यप्रामाण्यात् नागेशभट्टेन यत् उपपादितं तन्न समीचीनं इत्याकाङ्क्षायाम् उच्यते यत् अत्र एतादृशेषु सर्वेष्वपि लक्ष्येषु अतिव्याप्तिवारणार्थम् **उञि च पदे** इत्यस्मात् सूत्रात् पदे इत्यस्य मण्डूकप्लुत्या अनुवृत्तिरेव क्रियते। एवञ्च 'अचि' इत्यस्य पदे अभेदसम्बन्धेन विशेषणात् तदादिविधौ ह्रस्वात्परः पदावयवः ङम्पदबोध्यः यः तदव्यवहितोत्तरत्वविशिष्टस्य अजादेः पदस्य ङमुडागमः स्यात्। तथा 'अनिति' इत्यत्र इति इत्यस्य अजादिपदत्वाभावात् ङमुडागमः न। न वा दण्डिना इत्यादौ ङमुडागमापत्तिः।

**नागेशभट्टोजिदीक्षितमतयोर्विवेकः—**

किन्तु विद्वद्भिः विचारणीयं यत् नागेशमते विभक्तिविपरिणामो नास्ति किन्तु **उञि च** इत्यस्मात् सूत्रात् मण्डूकप्लुत्या पदे इत्यस्य अनुवृत्तिः आवश्यकी। अनिति दण्डिना इत्यादौ दोषवारणार्थं दीक्षितमते यद्यपि विभक्तिविपरिणामोऽस्ति तथाहि अनिति दण्डिना इत्यादौ अन् इत्यस्य दण्डिन् इत्यस्य वा ङमन्तपदत्वाभावात् ङमुडागमः न प्राप्तः अतः तद्वारणार्थम् उञि च पदे इत्यस्मात् सूत्रात् मण्डूकप्लुत्या पदे इत्यस्य अनुवृत्तिः नावश्यकी। एवञ्च नागेशमते ङमः इत्यस्य षष्ठ्यन्तत्वक्षस्वीकारे पदे इत्यस्य अनुवृत्तिः दीक्षितमते च विभक्तिविपरिणामः इति उभयोः मतयोः साम्यात् कथं दीक्षितमते गौरवं नागेशमते लाघवमिति प्रतिपादयितुं शक्यते। तत्रोच्यते यद्यपि तत्तत्सूत्रेषु विभक्तिपरिणामः क्लृप्तः। अतः केवलं विभक्तिविपरिणामरूपगौरवं दीक्षितमते नास्ति अपितु परमदण्डिना इत्यत्र दोषवारणार्थं दीक्षितेनापि उञि न पदे इत्यस्मात् सूत्रात् पदे इत्यस्य अनुवृत्तिः कर्तव्या एव। तथा सति दीक्षितमते विभक्तिविपरिणामः अनिति इत्यत्र पदे इत्यस्य अनुवृत्तिः इत्येतद्द्वयं कल्पनीयं भवति। नागेशमते तु पदे इत्यस्य अनुवृत्तिरेव कल्पनीया भवति इति कृत्वा नागेशमते लाघवं वर्तते दीक्षितमते गौरवम्। ननु दीक्षितमतेऽपि **उञि च पदे** इत्यस्मात् सूत्रात् पदे इत्यस्य अनुवृत्त्यैव अनिति इत्यत्र न दोषः न वा परमदण्डिना इत्यत्र दोषः इति दीक्षितमतेऽपि अनुवृत्तिमात्रमेव अस्तु तथा सति न गौरवं इत चेत् उच्यते इष्टापत्तिः, तदेव नागेशः ब्रवीति यत् दीक्षितेनापि यदि अनुवृत्तिः क्रियेत तथा सति विभक्तिविपरिणामः नावश्यकः इत्यस्य षष्ठ्यन्तत्वेऽपि ह्रस्वात्परः पदावयवः ङम्पद-बोध्यः यः तदव्यवहितोत्तरत्वविशिष्टस्य अजादेः पदस्य ङमुडागमः इत्यर्थकेन अनिति इत्यत्रापि दोषः दण्डिना इत्यत्र च न

दोषः परमदण्डिना इत्यादौ अपि नैव दोषः। अतः दीक्षितेनापि अयमेव पन्थाः अनुसर्तव्यः तस्मात् नागेशमतमेव सङ्गतं प्रतिभाति।

अत्र च परमदण्डिनौ परमदण्डिना इत्यत्र दोषवारणार्थं भट्टोजिदीक्षितेन **उत्तरपदत्वे चापदादिविधौ** इति वार्तिकस्य या प्रवृत्तिः कारिता प्रवृत्त्या च दोषः वारितः, स दोषवारणोपायः रत्नकारेभ्यः नागेशभट्टेभ्यश्च न रोचते। तथा चोक्तं नागेशेन उत्तरपदत्वे चेति प्रत्ययलक्षणनिषेधस्तु न माषकुम्भवापेन इत्यादौ पदव्यवायेऽपि इति निषेधसिद्धये तस्य यत्र उत्तरपदस्य कार्यित्वं तत्रैव प्रवृत्तेः। अतः परदण्डिनौ इत्यत्र दण्डिन् इत्यस्य कार्यित्वाभावेनैव वार्तिकेन **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रेण अनिषेधात् ङमुडागमापत्तिः वारयितुं न शक्यते। तस्मात् उञि च पदे इत्यस्मात् सूत्रात् पदे इत्यनुवृत्तिः कर्तव्या एव भवति। किन्तु अत्र नागेशमते एका आपत्तिः वर्तते यत् भाष्यकृता तेन निषेधेन सिद्धम् इति **ङमो ह्रस्वादचि ङमुण्** नित्यम् इति सूत्रभाष्ये उक्तम्। अधुना तेन निषेधेन इत्यस्य उत्तरपदस्य चापदादिविधौ इत्यनेन निषेधेन ङमुडागमः सिद्धः अयमर्थः सिद्धः। यदि उञि च पदे इत्यस्मात् सूत्रात् पदे इत्यनुवृत्तिः क्रियेत तथा सति परमदण्डिनौ इत्यत्र अजादिपदत्वाभावादेव ङमुडागमः न प्राप्तः। अतः प्राप्तौ सत्यां निषेधः इति कृत्वा तेन निषेधेन सिद्धम् इति वदतां भाष्यकाराणां वचनं विरुद्ध्येत। अतः **उञि च पदे** इत्यस्मात् सूत्रात् पदे इत्यनुवृत्तिः अप्रामाणिकी प्रतिभाति इति चेत् नागेशः इत्थं समाधत्ते यत् तेन निषेधेन सिद्धम् इत्येतत् सूत्रस्थभाष्योक्तिस्तु एकदेशिन एव अर्थात् एकदेशिभाष्यमिदं न सिद्धान्तभूतम्। यतो हि **उञि च पदे** इत्येतत्सूत्रव्याख्यानप्रसङ्गे भगवता भाष्यकृता पदे इति किम् तन्त्रे युतम् इत्यत्र दोषः प्रदर्शितः। तदनन्तरं पुनः **लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्** इत्यनया परिभाषया दोषः वारितः। तदनन्तरं पूर्वपक्षिणा प्रश्ने पृष्टे यत् पदे इति किमर्थं तर्हि यत् सिद्धान्तिना समाहितं पदे इत्युत्तरार्थम्। एवञ्च **ङमो ह्रस्वादचि ङमुण् नित्यम्** इत्यस्मिन् सूत्रे पदे इति गृह्यते। यदि पदे इत्यस्य अनुवृत्तिः अप्रमाणिकी स्यात् तर्हि उञि च पदे इत्यस्मिन् सूत्रे भगवता भाष्यकृता पदे इत्युत्तरार्थमिति यदुक्तं तदसङ्गतं स्यात्। अतः तेन निषेधेन सिद्धम् इत्यस्यैव एकदेशिभाष्यत्वं स्वीकार्यम्।

अथ पदे इत्युत्तरार्थम् इति भाष्यम् एकदेशिभाष्यम् अथवा तेन निषेधेन सिद्धम् इदं भाष्यं वा। अत्र विनिगमकाभावात् अन्यतरस्यापि भाष्यस्य एकदेशित्वं प्रतिपादयितुं शक्यते तर्हि नागेशस्यैव मतं भाष्यप्रामाण्यात् प्रमाणं दीक्षितस्य तु अप्रामाण्यमिति कथं निश्चेतुं शक्यते? तत्रोच्यते तेन निषेधेन सिद्धम् इति भाष्यमेव एकदेश्युक्तिः। यतो हि

माषकुम्भवापेन इत्यत्र पदव्यवायेऽपि इति निषेधसिद्धार्थं कार्यित्वनिवेश आवश्यकः। यदि कार्यित्वं निवेश्यते चेत् परमदण्डिनौ इत्यत्र दण्डिन् इत्यस्य उत्तरपदस्य कार्यित्वाभावात्। अनेन वार्तिकेन **प्रत्ययलोपे प्रत्ययलक्षणम्** इत्यस्य सूत्रस्य निषेधः भवितुं नार्हति। तस्मात् तेन निषेधेन सिद्धम् इति भाष्यमेव एकदेशिनः। पदे इत्युत्तरार्थम् इदं भाष्यं तु सिद्धान्तभूतम्। अतः परमदण्डिनौ इत्यत्र दोषवारणार्थं पदे इत्यस्य अनुवृत्तिः कार्या इति नागेशमतमेव ज्यायः प्रतीयते।

***

**सन्दर्भाः—**

1. परिभाषेन्दुशेखरः
2. अष्टाध्यायी, सूत्रम् 7.1.12
3. अष्टाध्यायी, सूत्रम् 7.1.9
4. पाणिनीयव्याकरणमहाभाष्यम्, द्वितीयखण्डः, पृ.18
5. प्रौढमनोरमा, अव्ययीभावान्ता, पृ.204
6. वैयाकरणसिद्धान्तकौमुदी, सूत्रम् - 134, पृ.12
7. वैयाकरणसिद्धान्तकौमुदी, सूत्रम् - 2501, पृ.223
8. पाणिनीयव्याकरणमहाभाष्यम्, षष्ठ खण्डः, पृ.107
9. परिभाषेन्दुशेखरः, पृ.48
10. प्रौढमनोरमा, अव्ययीभावान्ता, पृ.205-206
11. प्रौढमनोरमा, अव्ययीभावान्ता, पृ.207
12. लघुशब्देन्दुशेखरः, पृ.370

***

# विविधदार्शनिकदृष्ट्या लक्षणाविषयकं निरूपणम्

**राहुलपोखरियालः**

सर्वविधशास्त्रेषु शक्तित्रयं समाश्रित्य विवचेनं क्रियत एव। ताः शक्तयः अभिधा लक्षणा व्यञ्जना च। एतासु शक्तिषु अन्यतमा लक्षणा भवति। एनां शक्तिं स्वीकृत्य प्रायः सर्वेषु शास्त्रेषु महान् विचारः कृतो वर्तते। आलङ्कारिकैः नैयायिकैः मीमांसकैः वैयाकरणैश्च लक्षणाविषयकाणि स्वकीयानि मतानि दार्ढ्येन प्रकटितानि सन्ति। अतः एनां लक्षणां स्वीकृत्य एकैकशः अहं विविधदार्शनिकानां मतानि अत्रोपस्थापयितुं प्रयते।

## तार्किकाणां मते लक्षणा

लक्षणाविषये बहूनां दार्शनिकानां नैकानि मतानि समुपस्थापितानि सन्ति। शब्दशक्तिरपि त्रिधा प्रकल्पिता = अभिधा, लक्षणा, व्यञ्जना च। अभिधाशक्त्या यदा शाब्दबोधो नैव सिद्ध्यति तदा लक्षणाश्रयणीया भवति। अतः नैयायिकानां मते लक्षणालक्षणं निरूप्यते। ''**स्वशक्यसम्बन्धो लक्षणा**''[1] इति स्वरूपं लक्षणायाः भवति। यथा ''गङ्गायां घोषः'' कस्यचिदपि पदस्य वाक्यस्य च शाब्दबोधाय सर्वप्रथमं शक्तिः उपस्थिता भवति। शक्त्याऽत्र नैव जायते शाब्दबोधः। यतो हि प्रवाहितजलप्रवाहे घोषो नैव सम्भविष्यति, अतः काचिदन्या शक्तिः स्वीकर्तव्या। सा च लक्षणा। एषा चोपरि निरूपिता स्वशक्यसम्बन्धो लक्षणा। स्वपदेन गङ्गापदम्, शक्यपदेन प्रवाहितजलप्रवाहः, तस्य सम्बन्धः तीरे, अतः घोषः तीरे सम्भविष्यति। गङ्गायां घोषः, अस्यार्थः गङ्गायाः तीरे घोष इति। पुनश्च अस्याः लक्षणायाः भेदद्वयं क्रियते– गौणी शुद्धा च। गौणीलक्षणायाः स्वरूपं निरूप्यते। स्वनिरूपितसादृश्या-धिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी। यथा–''सिंहो माणवकः'' माणवकाय सिंहः उच्यते। कथञ्चेत् स्वपदेन माणवकः निरूपितसादृश्याधिकरणं शूरत्वं वीरत्वं साहसत्वञ्च, एतदेव सादृश्याधिकरणं सिंहे माणवके च। अतः सिंहस्य शक्यार्थो माणवके गतः। एतादृशी वृत्तिः गौणी। तद्विपरीता शुद्धा भवति। तदतिरिक्तसम्बन्धेन शक्यसम्बन्धार्थप्रतिपादिका शुद्धा उच्यते। पुनश्च एषा लक्षणा प्रकारान्तरेण

द्विधा प्रकल्प्यते– अजहत्स्वार्था जहत्स्वार्था च। ''स्वार्थसंवलितपरार्थाभिधायिकाऽ-जहत्स्वार्था।''[2] स्वार्थसंविलितं नाम = स्वशक्यार्थेन सह मिलित्वा, परार्थाभिधायिका = लक्ष्यार्थस्य अभिज्ञानमपि या कारयति, सा अजहत्स्वार्था वृत्तिः भवति। ''छत्रिणो यान्ति'' अत्र छत्रिणः इति पदस्य शक्यार्थो वर्तते ''छत्रधारिणः पुरुषाः'' इति। अत्र शक्यार्थेन सह लक्ष्यार्थोऽपि परिलक्ष्यते। एवमेव ''कुन्तान् प्रवेशय'' अत्रापि कुन्तधारिणः पुरुषान् प्रवेशय, एतादृशानि उदाहरणानि अजहत्स्वार्थायाः समुपलभ्यन्ते।

जहत्स्वार्था नाम = स्वार्थपरित्यागेन तदर्थाभिधायिकाऽन्या। स्वार्थपरित्यागेन=स्वशक्यार्थपरित्यागेन इतरार्थाभिधायिका = लक्ष्यार्थस्याभिज्ञानं या कारयति सा जहत्स्वार्था। उदाहरणं यथा–''गां वाहीकं पाठय'' गां पाठयितुं नैव शक्यते। अतः अत्र गोपदेन मूर्खपुरुषं पाठय'' अयं लक्ष्यार्थः सम्भवति, तस्मादत्र जहत्स्वार्था लक्षणा। पुनश्चोच्यते, अस्याः लक्षणायाः निमित्तानि कानि सन्ति। अतः इदानीं निमित्तपदानां संग्रहः क्रियते पद्येनानेन–

**तात्स्थ्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च।**
**तत्साहचर्यात्तादर्थ्याज् ज्ञेया वै लक्षणा बुधैः॥**[3]

अनेकैः सम्बन्धैः लक्षणा उपतिष्ठते, तथापि पञ्चैव सम्बन्धपदानि प्रणीतानि सन्ति। यथा च तात्स्थ्यम्, ताद्धर्म्यम्, तत्सामीप्यम्, तत्साहचर्यम्, तादर्थ्यञ्च। प्रत्येकम् उदाहरति–तात्स्थ्यात् ''मञ्चा हसन्ति'' अत्र मञ्चास्तु हसितुं नैव शक्नुवन्ति। अतः मञ्चस्थाः पुरुषाः हसन्ति'' अर्थोऽयं समुदेति। ताद्धर्म्यम्–'सिंहो माणवकः' उदाहरणेऽस्मिन् माणवकपुरुषः सिंहो नैव भवितुमर्हति। अतः सिंहे शौर्यादयः इति धर्माः, ते पुरुषेऽपि अर्थोऽयं ग्रहीतव्यः। तत्सामीप्यम्–'गङ्गायां घोषः' उदाहरणे जलप्रवाहे गृहं नैव शक्यम्। अतः गङ्गातीरे गृहमस्मिन्नर्थे लक्षणा। एवमेव तत्साहचर्यम्–'यष्टीः प्रवेशय' तादर्थ्यम्–इन्द्रार्था स्थूणा इन्द्रः।

**लक्षितलक्षणा–''लक्षितेन भ्रमरपदेन शक्त्यैव बोधोऽस्तु इत्याक्षेपः तत्परिहारश्च।''**

प्राचीननैयायिकाः द्विरेफपदे लक्षितलक्षणां स्वीकुर्वन्ति। द्विरेफपदस्य प्रथमलक्षणा भ्रमरपदे भवति, द्विरेफसत्त्वात् भ्रमरपदस्य प्रतीतिः संजायते। पुनश्च भ्रमरपदस्य भ्रमररूपार्थे लक्षणा भवति। अतः लक्षितलक्षणा कल्प्यतेऽत्र। नागेशः आक्षिपति–द्विरेफपदेन भ्रमरपदे न लक्षणाऽपितु शक्त्यैव द्विरेफपदेन भ्रमरपदस्य बोधो जायते। तन्न युक्तं यतोहि प्रत्ययस्य प्रकृत्यर्थे अन्विते च सति स्वार्थबोधकत्वं भवति। अनेन नियमेनैव भ्रमरस्य द्विरेफपदलक्षितस्य भ्रमरपदार्थेनान्वयः, यतोहि द्विरेफपदं भ्रमरे एव सम्भवति। यदि द्विरेफेण भ्रमरार्थे अन्वयो

न स्यात् तर्हि विभक्त्यर्थान्वयानुपपत्तिः। अतः द्विरेफपदस्य लक्षितलक्षणा वृत्तिरिति। एवञ्च लक्षितस्य भ्रमरपदस्य लक्षणा लक्षितलक्षणा। सा च द्विरफेपदस्य वृत्तिः।

### लक्षणाविषये आलङ्कारिकाणां मतम्

मुख्यार्थस्य वाच्यार्थस्य च बोधिका शक्तिः अभिधा भवति। परञ्च यत्र–कुत्रापि मुख्यार्थस्य वाक्ये अन्यैः पदैः सह अन्वयो बाधते तत्र तात्पर्यस्योपपत्तिः नैव जायते। तत्र च मुख्यार्थेन सम्बन्धोऽन्योऽर्थः प्रतीयते। तस्य बोधिका शक्तिः लक्षणा इत्युच्यते। अतः मम्मटेन लक्षणायाः लक्षणं कृतम्–

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।।**[5]

अत्र लक्षणायाः कृते त्रितयमपेक्षितं वर्तते। सर्वप्रथमं मुख्यार्थबाधो द्वितीयः तद्योगः ''सम्बन्धः'' तृतीयश्च रूढिः प्रयोजनञ्च। एतेषु एकस्यापि अभावो भवति चेत् लक्षणा नैव भवितुं शक्नोति। यथा उदाहरणम्–गङ्गायां घोषः। अत्र जलप्रवाहे घोषः नैव भवितुं शक्नोति। मुख्यार्थस्य बाधो जातः, बाधत्वात् तद्योगः तीरे भवति, अर्थः आयाति गङ्गातीरे घोषः। अत्र प्रयोजनवती लक्षणा, गङ्गायां घोषः–अस्य वाक्यस्य प्रयोजनमस्ति यत् शीतत्व–पावनत्वादिकं गङ्गायां जायते तथैव तत्तीरेऽपि परिलक्ष्यते। कर्मणि कुशलः अत्र रूढि–लक्षणा। कुशलशब्दस्यावयवार्थो भवति, कुशान् लाति इति कुशलः, परं न विवक्षितोऽर्थोऽयं यतोहि कुशलपदेनात्र चतुरो विवक्षितः रूढत्वात्। पुनश्च ग्रन्थकारः लक्षणायाः भेदद्वयं विदधाति। उपादानलक्षणा लक्षणलक्षणा चेति।

**स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा।।**[6]

उपादानलक्षणायाः लक्षणं विहितं–स्वसिद्धये पराक्षेपः। अत्र स्वकीयहिताय अन्य-स्याक्षेपं करोति। स्वकीयमर्थमपि न जहाति सा भवत्युपादानलक्षणा। लक्षणलक्षणायां परार्थं स्वसमर्पणं भवति। अन्यस्य कृते स्वकीयं सम्पूर्णार्थं जहाति। उदाहरण-मुपादानलक्षणायाः = कुन्ताः प्रविशन्ति। अत्र कुन्तास्तु प्रविशन्ति। तैः साकं पुरुषाः अपि यान्ति, कुन्तधारिणः पुरुषाः प्रविशन्ति, अर्थोऽयं समायाति। कुन्तपदात् पुरुषाः आक्षिप्यन्ते। एवमेव यष्टयः प्रविशन्तीत्यत्रापि।

लक्षणलक्षणायाः प्रमुखमुदाहरणं सर्वैः स्मर्यते–गङ्गायां घोषः। गङ्गापदं स्वार्थं विहाय तीरे संलक्ष्यते। अतः परार्थं स्वसमर्पणम्। अग्रेऽपि मम्मटेन लक्षणायाः अन्ये भेदाः

कृताः, आहत्य षड्विधा लक्षणाः प्रतिपादिताः। लक्षणाविषयकं गम्भीरं चिन्तनं साहित्यदर्पण-कारेणापि कृतम्। का नाम लक्षणेति जिज्ञासायां लिख्यते–

**मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।**[7]

वाच्यार्थस्य वाक्ये अनन्वयात् प्रसिद्धेः वा प्रयोजनवशादन्यस्यार्थस्य प्रतीतिः यत्र भवति सा वृत्तिः लक्षणोच्यते। अत्रापि यथा–मम्मटेन लक्षणायाः भेदद्वयम् अकारि तथैव विश्वनाथेनापि उपादानलक्षणा लक्षणलक्षणा चेति भेदद्वयं क्रियते। परञ्च एतयोः द्वयोः भेदान् कृत्वा पुनः आहत्य अशीतिः भेदाः प्रदर्शिताः सन्ति साहित्यदर्पणे।

## वेदान्तदर्शने लक्षणा

दर्शनेषु लक्षणायाः महान् विचारः क्रियमाणो विद्यते–यथा वेदान्तदर्शने यानि महावाक्यानि कथितानि तानि अखण्डार्थबोधकानि वाक्यान्येव। महावाक्येषु पदयोः सामानाधिकरण्यात् तदर्थयोः अपि ऐक्यं ज्ञायते। यथा महावाक्यं तत्त्वमसि, अत्र त्वं-पदेन जीवः बोद्धव्यः। तत्पदेन ब्रह्मणः परिज्ञानं, जीवब्रह्मणोः अभेदो वक्तव्यः। परञ्चात्रैव किञ्चिज्ज्ञानधर्मविशिष्टस्य जीवस्य तथा सर्वज्ञत्वधर्मविशिष्टस्य ब्रह्मणः, द्वयोः ऐक्यं कथं मन्तव्यम्। तदर्थमत्र लक्षणा स्वीकर्तव्या भवति। तर्हि जिज्ञासा जायते, का लक्षणाऽत्र समाश्रयणीया। तर्हि विवेचयन्ति, गङ्गायां घोषः जहल्लक्षणा तावन्न सम्भवति, तत्र गङ्गाघोषयोः आधाराधेयभावलक्षणः विरुद्धः वाक्यार्थः सर्वथा। तमर्थं सम्पूर्णरूपेण त्यक्त्वा गङ्गासम्बिन्धितीरं लक्ष्यते। परं तत्त्वमसि वाक्ये कार्त्स्न्येन विरोधः एवं नास्ति। परोक्षत्वापरोक्षत्वविशिष्टचैतन्ययोः एकत्वलक्षणे वाक्यार्थे परोक्षत्वापरोक्षत्वांशः एव विरोधः। चैतन्यैकत्वांशस्य न, जहल्लक्षणा तावन्न सम्भवति। शङ्कते–गङ्गापदं स्वार्थं त्यक्त्वा तत्सम्बन्धितीरं लक्षयति। तथैव तत्पदं स्वार्थं परोक्षत्वादिवैशिष्ट्यं परित्यज्य त्वंपदार्थं लक्षयतु। अतः कथन्नात्र जहल्लक्षणा स्वीकर्तुं शक्यते? समाधत्ते यत्–मुख्यार्थविरोधे तत्सम्बन्धिनि अश्रुतपदार्थे लक्षणा भवति। यथा लक्ष्यमाणतीरपदार्थे–वाचकपदाश्रवणेन तदर्थप्रतीत्यै लक्षणा अपेक्ष्यते। तत्त्वमसि इति वाक्ये तु तत्त्वम्पदयोः श्रूयमाणत्वात् पुनः तयोः अन्यतरपदेन अन्यतरपदार्थप्रतीत्यर्थं लक्षणायाः अपेक्षा नास्ति। एवमेवाजहल्लक्षणाऽपि न सम्भवति। यथा शोणो धावति, इत्यत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धात् शोणपदं स्वार्थापरित्यागेन स्वाश्रयम् अश्वं लक्षयति, येन विरोधः परिहृतो भवति। अत्र परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वरूपो वाक्यार्थो विरुद्धः इति।

परोक्षत्वादिलक्षणस्य मुख्यार्थस्य परित्यागेन तत्सम्बन्धी यः कश्चनार्थः तथापि

परोक्षत्वादिविरुद्धधर्मविशिष्टयोः ऐक्यरूपः अर्थः विरुद्ध एव तिष्ठति। अतः नाजहल्लक्षणा। ततश्च जहदजहल्लक्षणा स्वीकरणीया, यथा सोऽयं देवदत्तः, इत्यत्र विरुद्धतत्कालैतत्काल-विशिष्टांशं परित्यज्य अविरुद्धं देवदत्तांशमात्रं सोऽयमिति पदद्वयं लक्षयति। तद्वदत्रापि विरुद्धपरोक्षत्वादिविशिष्टांशं परित्यज्याविरुद्धम् अखण्डचैतन्यमात्रं तत्पदं त्वम्पदं च लक्षयतः। अंशस्यैव त्यागाद् भागलक्षणेति, अस्याः लक्षणायाः नामान्तरम्। शारीरककाराः स्वकीयं मतं दर्शयन्ति–

**साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाऽहम्।**
**शब्दोऽहङ्कारवाची भवति तु जहती लक्षणा तत्र पक्षे।।**[8]

अयमर्थः (अहं ब्रह्मास्मि) इत्यत्र ब्रह्मात्मतत्त्वं वाच्यवाचकादिसर्वव्यवहारातीतत्वात् ब्रह्मशब्देनापि नोच्यते। अतः **मम योनिर्महद्ब्रह्म** इत्यादौ इव महावाक्ये ब्रह्मशब्दः चैतन्यच्छायोपेतम् अज्ञानं वदति। एवमहं शब्दोऽपि न आत्मवाची किन्तु अहंकारवाची। लोके तस्मिन्नेवार्थे अहं–शब्दः प्रयुज्यते। अत्र साभासाज्ञानस्य अधिष्ठातृत्वेन अहङ्कारस्य साक्षित्वेन च चैतन्यम् अनुगतम्। अतः ब्रह्माहं च शब्दौ जहल्लक्षणया स्वार्थं परित्यज्य केवलं चैतन्यं लक्षयतः। यथा–अयो दहति इत्यत्र अयश्शब्दः स्वार्थं परित्यज्य तत्सम्बन्धिनि अग्नौ वर्तते तद्वत्। भगवत्पादैः वाक्यवृत्तौ प्रोक्तम्–

**तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।**
**सोऽयमित्यादिवाक्यस्य पदयोरिव नापरा।।**[9]

## मीमांसादर्शने लक्षणा–

सम्प्रति मीमांसकानां लक्षणाविषयकं मतम् उपस्थाप्यते। मीमांसकानां लक्षणे कश्चन भेदः संदृश्यते यथा एते लक्षणं कुर्वन्ति–''**स्वबोध्यसम्बन्धो लक्षणेति।**''[10]

स्वबोधितार्थस्य सम्बन्धः लक्षणा। यथोदाहरणं दत्तम्। गभीरायां नद्यां घोषः, प्रयोगेऽस्मिन् कस्य पदस्य च लक्षणा स्यात्, यतो हि वाक्ये गभीरायां नद्यामिति वाक्यस्य गभीराभिन्ननदीतीरे लक्षणा नैव भवितुं शक्नोति यतो हि मीमांसकानां मते वाक्ये शक्तेः अभावात्, स्वशक्यसम्बन्धरूपलक्षणायाः असम्भवाच्च। तथाहि पुनः गभीरपदस्य तीरेऽपि लक्षणा न स्यात् यतो हि नद्याम् अनन्वयापत्तेः न हि तीरं नदी। अत एव न नदीपदे सा लक्षणा शक्या, गभीरपदार्थानन्वयप्रसङ्गात् तीरं गभीरं न भवति। न च प्रत्येकं पदे सा लक्षणा भवितुं शक्यते, विशिष्टनदीतीराप्राप्तिप्रसङ्गात्। अतः न हि नदीपदं गभीरनदीतीरकं लक्षकम्, गभीरपदं तात्पर्यग्राहकमिति मीमांसकानां सिद्धान्तः।

### मुकुलभट्टस्य मण्डनमिश्रादीनां च लक्षणाविषयकं चिन्तनम्

मुकुलभट्टस्य एकमात्रग्रन्थः समुपलभ्यते अभिधावृत्तिमातृका। ग्रन्थेऽस्मिन् शक्तित्रयस्य स्थाने केवलं अभिधाशक्तिरेव स्वीकृता। अस्याः अभिधाम् आहत्य दशभेदाः प्रतिपादिताः सन्ति। अतः स्वयमेव निर्दिष्टं ग्रन्थे–इत्येतदभिधावृत्तं दशधात्र विवेचितम्। अत्रैव उपादानलक्षणायाः गौरनुबन्ध्यः पीनो देवदत्तो दिवा न भुङ्क्ते, उदाहरणद्वयं प्रदत्तम्। गौरनुबन्ध्यः वैदिकप्रयोगे उक्तः। गावः उपाकरणादिद्वारा पूजनार्थं बन्धनीयाः सन्ति। अन्ये च अनुबन्ध्यस्यार्थः आलम्भो हन्तव्यश्चेति स्वीकुर्वन्ति। यथोक्तं मीमांसकाः जातौ शक्तिं मन्यन्ते। अतः गोशब्दस्य वाच्यार्थः गोत्वजातिः भवति।

तस्यां जातौ आलम्भनादिक्रिया न सम्भवति। अतः मुख्यार्थबाधो जायते। तदा गोशब्दः बन्धनेन सह गोत्वजातिरूपार्थस्य अन्वयसिद्ध्यर्थं व्यक्ति–आक्षेपेण बोधं कारयति। अतः उपादानलक्षणा स्वीकर्तव्या। मीमांसकाः अर्थवादवाक्येषु प्राशस्त्यस्य लक्षकं मत्वा वाक्येऽपि लक्षणां स्वीकुर्वन्ति। यथा–पीनो देवदत्तो दिवा न भुङ्क्ते, देवदत्तः स्थूलो जायते, परं दिवसे न अत्ति। लौकिकप्रयोगे लक्षणायाः उदाहरणमिदं वर्तते, अत्र दिवसे नात्ति चेत् स्थूलत्वं कथमिति सम्भवाभावात्। अतः मुख्यार्थबाधत्वात् वाक्यमिदं स्वान्वय-सिद्ध्यर्थं रात्रिभोजनस्याक्षेपद्वारा बोधं कारयति। अतः इदमपि उपादानलक्षणायाः उदाहरणमिति।

### नागेशाभिमतं लक्षणाबीजम्

केचन **( अन्वयाद्यनुपपत्तिसन्धानञ्च लक्षणाबीजम् )**[11] इति स्पष्टयन्ति। यथा गङ्गायां घोषः, जलप्रवाहे घोषः नैव भवितुं शक्नोति। अतः गङ्गायां घोषः इति द्वयोः पदयोः परस्परमन्वयो नैव सम्भवति, अन्वयानुपपत्तिसन्धानमेव। अतः अत्र लक्षणाबीजं स्वीकर्तव्यमेतत् पुनश्च नागेशेन लक्षणाबीजं परिवर्तितम्। तन्मते उच्चार्यमाणे लक्षणाबीजे दोषः सन्दृश्यते। अतः अपरं लक्षणाबीजं विधातव्यं तच्च ''**तात्पर्यानुपपत्तिप्रति-सन्धानमेव तद्बीजम्**''[12] नागेशमते तात्पर्यानुपपत्तिप्रतिसन्धानं लक्षणायाः बीजं विद्यते। तथा हि गङ्गायां घोषः वाक्येऽस्मिन् घोषपदेन मत्स्यादिकं स्वीकृत्य गङ्गायां भवितुं शक्यते। अतः नान्वयानुपपत्तिः कथञ्चात्र लक्षणा। तस्मात् तात्पर्यानुपपत्तिः लक्षणाबीजं स्वीकर्तव्यम्। वक्तुः तात्पर्यं गङ्गातीरे शैत्यपावनत्वादिकं वर्तते। अतः तात्पर्यानुपपत्तिः लक्षणाबीजम् इति स्वीकारे नास्ति काचिद् विप्रतिपत्तिः। पुनश्च 'काकेभ्यो दधि रक्ष्यताम्' उदाहरणेऽस्मिन्नपि लक्षणा न स्यात्। यतो हि काकेभ्यः एव दधि न रक्षणीयम्, अपि दध्युपघातकेभ्यः सर्वेभ्यः दधि रक्षणीयं वर्तते।

अयमेवाभिप्रायः वक्तुः प्रयोगेऽस्मिन् तात्पर्यमेव ग्रहीतव्यं तदैव लक्षणा दध्युपघातकेषु।

नागेशस्याभिमतं उररीकृत्य प्रौढनैयायिकाः काकेभ्यो दधि रक्ष्यताम् प्रयोगे लक्षणां सन्दधति। पुनश्चात्रैव नागेशेन वृद्धानां लक्षणायाः पक्षोऽयमपि प्रतिपादितः। जहदजहल्लक्षणा विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशे लक्षणायां जहदजहल्लक्षणा वाच्यार्थे कस्यचिदंशस्य त्यागः, कस्यचिदंशस्य ग्रहणं जहदजहल्लक्षणोच्यते यथोदाहरणेन ग्रामैकदेशे दग्धे ग्रामो दग्धः, कस्यचिद् ग्रामस्य एकदेशः ज्वलितः, तथापि व्यवहारो भवति ग्रामोऽयं ज्वलितः। पटैकदेशे दग्धः पटो दग्धः।

### लक्षणाखण्डनं नागेशमते

नागेशः तत्र पदेन सर्वान्ते नैयायिकैः स्वीकृता पृथक् वृत्तिः लक्षणा सा नैव स्वीकरणीया इत्यभिप्रैति। यतो हि तात्पर्ये स्वीकार्ये (सर्वे सर्वार्थवाचकाः) इति न्यायोऽयं फलति। सर्वे शब्दाः सर्वेषामर्थानां वाचकाः भवन्ति। इति भाष्यकथनं सर्वथा मन्तव्यम्, अस्माज्ज्ञायते वृत्तिद्वये गृह्यमाणे तयोः अवच्छेदकावपि द्वौ मन्तव्यौ तस्माद् गौरवं स्यात्। यतो हि शक्तिवृत्त्या सर्वत्र स्वीकर्तुं शक्यते, चेत् किमर्थं लक्षणाऽश्रयणीया। लक्षणेयं जघन्या अर्थान्निन्दनीयेति। पुनः कथं गङ्गापदेन तीरे लक्षणा इति प्रश्ने पृष्टे सति भ्रममूलकं तन्मतम्, तात्पर्ये स्वीकार्ये **सर्वे सर्वार्थवाचकाः** इति भाष्यवचनं वेदितव्यम्। शक्तिरपि द्विविधा प्रसिद्धा अप्रसिद्धा च "**आमन्दबुद्धिवेद्यत्वं प्रसिद्धत्वम्।**"[13] मन्दबुद्धयः ये भवन्ति, तेभ्यः ज्ञातुं योग्या प्रसिद्धा। सहृदयानां परिपक्वजनानां कृते ज्ञातुम् अप्रसिद्धा शक्तिः ज्ञातव्या। गङ्गादिपदे प्रवाहाद्यर्थस्य प्रसिद्धा शक्तिरेव, गङ्गापदस्य तीरे अप्रसिद्धा शक्तिश्च। पुनश्च आक्षिपति, **सर्वे सर्वार्थवाचकाः** अस्य न्यायस्य परिज्ञाने कथन्न घटपदेन मठपदस्यापि बोधो जायेत, चेदुच्यते तात्पर्याभावात् तात्पर्यं कस्य वेदितव्यम्, तथाहि ईश्वरस्य महर्ष्यादीनां शिष्टानां परम्परया यल्लभ्यते तदेव स्वीकरणीयम्। अतः लक्षणायाः सर्वथा नागेशेन खण्डनं विहितमेव।

### समीक्षणम्

सर्वैः दार्शनिकैः प्रायः लक्षणा स्वीकृता एव। शब्दशक्तिस्त्रिधा तासु लक्षणां विनां नास्ति गतिः कुत्रापि यथा–"आलङ्कारिकाः केचन षोढा लक्षणाः, केचन अशीतिः लक्षणाः, अन्यानि मतानि अपि स्वीकृतानि सन्ति। वेदान्तेऽपि चतुर्महावाक्येषु लक्षणैव आश्रिता वर्तते, यथा तत्त्वमसि" आदिषु वाक्येषु। न्यायेऽपि "स्वशक्यसम्बन्धो लक्षणा" इति स्वरूपं प्रदर्श्य लक्षणां विवेचयन्ति नैयायिकाः। वैयाकरणाः अपि लक्षणां स्वीकुर्वन्ति परं नागेशभट्टः तात्पर्यं विविच्य लक्षणावृत्तिं परित्यजति। विशेषोऽत्र नागेशेन प्रतिपादितः।

***

**सन्दर्भाः–**

1. तत्त्वचिन्तामणिः शब्दखण्डः, पृ.113
2. परमलघुमञ्जूषा (चौ.सु.भा., लोकमणिदाहालः), पृ.58
3. तत्रैव, पृ.25
4. शाब्दबोधमीमांसा, पृ.56
5. काव्यप्रकाशः, 2.12
6. तत्रैव, 2.13
7. सा.द.द्वि.परिच्छेदः, पृ.61
8. अद्वैतसिद्धिः, पृ.82
9. पञ्चदशी, पृ74
10. प.ल.म., पृ.2
11. तत्रैव, पृ.26
12. तत्रैव, पृ.26
13. तत्रैव, पृ.29

***

# परिशिष्टम्

घटकर्परकविप्रणीतम्

# घटकर्परकाव्यम्

प्रधानसम्पादकः
**प्रो. गोपबन्धु मिश्रः**
*
सम्पादकः
**डॉ. बबुआ नारायण मिश्रः**

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

**घटकर्परकाव्यम्**
सम्पादकः
**डॉ. बबुआ नारायण मिश्रः**

⊛

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

वर्षम् 2021

© प्रकाशकाधीनः

मुद्रकः-
**दी महावीर प्रेस**
भेलूपुर, वाराणसी।

# प्रधानसम्पादकीयम्

बिहारप्रान्तस्य पुरातनेषु नगरेषु सांस्कृतिकस्थलेषु चान्यतमा नगरी 'आरा' दिव्यशक्तेः मातुः आरण्यदेव्याः सकलाशीराशिशक्त्या भारतभुवि राराजते। तत्र च संस्कृतभाषां भारतीयसंस्कृतिं च पुरस्कृत्य अनेके विद्वांसोऽशोभयन्त शोभयन्तेतरां चेमां नगरीम्। तेषां समेषामपि पुण्यात्मनां निखिलशास्त्रशास्त्रान्तरेषु कृतभूरिपरिश्रमाणां संस्कृतविदुषां सदिच्छया संस्कृतभाषां तद्गतज्ञानपरम्परां च सर्वत्र प्रसारयितुं 1987तमे वर्षे एतस्यां नगर्यां 'संस्कृतप्रसारपरिषद्' इत्यभिधाना संस्था संस्थापिता। तस्याः परिषदः नानाविध-संस्कृतप्रचारप्रसारात्मककार्यक्रमैः सह प्रतिवर्षं मार्च–सितम्बरमासयोः प्रकाश्यमानं 'आरां' 'आरण्यदेवीं' आरण्यकसंस्कृतिं च प्रतिनिधिरूपेण पोषयत् 'आरण्यकम्' इति संस्कृत-शोधपत्रं प्रारब्धम्। तस्य विधिवत् पञ्जीकरणात् परम् 1994 तमवर्षतः नियमिततया प्रकाश्यमानमिदं शोधपत्रं सम्प्रति अष्टाविंशतिं वर्षाणि स्वस्य संशोधनात्मिकीं यात्रां सम्पाद्य अग्रेसरत्वं साधयति।

शोधपत्रस्यास्य शोधात्मकलेखानां संस्कृतेनैव प्रकाशनमिति लक्ष्यं लक्षणं च पुरस्कृत्य प्रवर्तमानतायाम् अद्यावधि 'संस्कृतसौरभसञ्चयनम्' इति शीर्षकेण अप्रकाशितमातृकाणां प्रकाशनं परिशिष्टरूपेण विधाय अनन्तरकाले स्वतन्त्रपुस्तकरूपेण प्रकाशनमित्येकं विशिष्टं कार्यं विद्यतेतराम्। एतस्मिन् उपक्रमे पूर्वमेव 'सुदामचरितम्', 'भरतचरितम्', 'उपेन्द्रविज्ञानसूत्रम्' इत्यादीनि पुस्तकानि एतया रीत्या एव प्रकाशितानि सन्ति। गतवर्षेषु एषः उपक्रमः काञ्चित् शिथिलतां प्राप्तप्रायः आसीत्। किन्तु पुनरपि तस्यैव उपक्रमस्य कृते 'घटकर्परकाव्यम्' इति कश्चित् फलवान् काव्यवृक्षः सम्प्राप्तः इति महतः प्रमोदस्यायं विषयो वर्तते।

'घटकर्परकाव्यम्' इदं 'घटकर्पर' इति नाम्नैव विविधेषु सन्दर्भेषु उल्लिखितस्य महाकवेः लघुस्वरूपं काव्यमस्ति। अत्र काचित् प्रोषितभर्तृका नायिका नायकं प्रति मेघमुखेन आत्मनः कुशलवार्तायुतं सन्देशं प्रेषयति। महाकविकालिदासविरचितेन 'मेघदूतम्' इति खण्डकाव्येन सह एतस्य काव्यस्य काचित् तुल्यधर्मितापि विद्यते। किं च घटकर्परकविरपि महाकविकालिदासस्य सामसमयिकः राज्ञः विक्रमादित्यस्य सभापण्डितः इति किञ्चित्

आभाणकमपि प्रथते। तद् यद् भवतु, सम्प्रति परिशिष्टेऽस्मिन् घटकर्परकाव्यमिदम् एकया तट्टीकया सहितं डॉ.बबुआ नारायण मिश्रवर्येण सम्पादितमिति मोदप्रदोऽयं विषयः। एतस्याः टीकायाः एका एव मातृकोपलभ्यते इति वदति सम्पादकवर्यः।

काशी हिन्दू विश्वविद्यालयान्तर्गतकलासंकाये संस्कृतविभागे स्नातकोत्तरं पी-एच्.डी. चेत्युपाधिद्वयेन विभूषितः डॉ. बबुआ नारायण मिश्रः आधुनिककाले शास्त्रीयपरम्परानिहितेन ज्ञानेन सहाधुनिकशोधतन्त्रेऽपि कुशली विद्यते। सम्प्रति असम-प्रान्तस्य सिलचरनगरे केन्द्रीयविद्यालये संस्कृतशिक्षकरूपेण सेवारतेन श्रीमता मिश्रवर्येण महता श्रमेण निष्ठया च घटकर्परकाव्यस्यास्येयम् अनन्या मातृका संकलिता सम्पादिता किं च संस्कृतप्रसारपरिषदः पक्षतः प्रकाशयितुम् अनुमतिरपि प्रदत्तेति हेतोः परिषदः पक्षतः 'आरण्यकस्य' पक्षतश्च तस्य कृते हार्दां कृतज्ञतां विज्ञापयामः।

शोधपत्रस्य परिशिष्टरूपेण प्रकाशितमिदं काव्यम् अचिरादेव स्वतन्त्रपुस्तकरूपेण उपलब्धं भविता। एतस्य पाठः, संशोधनम् एवमेव एततुल्यकार्यसम्पादनं विदुषां द्वारा अवश्यमेव पुरस्करिष्यत इत्याशास्य विरम्यते।

गोपबन्धुमिश्रः

गोपबन्धु मिश्र

संस्कृतप्रसारपरिषदः पक्षतः

# आमुखम्

नाविदितं विदुषां भारतीयविद्यापरम्परायाः प्राचीनत्वम्। भारतीयविद्या द्विधा विभज्यते वैदिकी लौकिकी च। तत्र वेदानां पाठशुद्धौ विद्वांसोऽतीव दत्तावधाना आसन्, तत्र शब्दस्यैव प्राधान्यात्। सम्पूर्णं वैदिकवाङ्मयं श्रुतिसरण्या ररक्षुर्भारतीयविद्वांसः। श्रुतिपरम्परया सम्प्रति वेदानां शुद्धः पाठ उपलभ्यते।

विविधोपायैर्लौकिककाव्यानां संरक्षणाय प्रयेतिरे प्राच्यविद्याविशारदा विपश्चितः। लौकिककाव्यान्यपि बहुकालपर्यन्तं श्रुतिपरम्परया संरक्षितानि। सम्प्रत्यपि कानिचिन्मौखिक-महाकाव्यानि लोकपरम्परया संरक्षितानि विद्यन्ते।[1] काव्यानां संरक्षणे गुरुशिष्यपरम्पराया अपि महद् योगदानं विद्यते। काव्यचिकीर्षवः शिष्या गुरुपरम्परया पूर्ववर्तिकवीनां काव्यानामवेक्षणं विधाय नैपुण्यमर्जयन्ति शक्तिर्नैपुण्यमभ्यासश्चेति काव्यस्य समुदितं कारणम्–

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥**[2]

तत्र नैपुण्यावाप्त्यर्थं काव्यादीनामवेक्षणमावश्यकम्।। वृत्तपूरणसमस्यापूरणादीनि काव्याभ्यासस्य साधनानि–

**वृत्तपूरणमुद्योगः पाठः परकृतस्य च।**
**काव्याङ्गविद्याधिगमः समस्यापरिपूरणम्॥**[3]

वृत्तपूरणार्थं समस्यापूरणार्थञ्च प्रायेणान्येषां कवीनां लोकप्रियत्वं गतानि पद्यान्युपयुज्यन्ते। समस्यापूरणात्मककाव्यानामपि परम्परा दरीदृश्यते संस्कृतसाहित्ये।[4]

भारतीयविद्यापरम्परायाः संरक्षणे लिपिकाराणामविस्मरणीयमवदानं वर्तते। तेषामेव सम्प्रयासेन सम्प्रति लक्षाधिका ग्रन्था उपलभ्यन्ते। पाण्डुलिपिषु लिपिकाराणां प्रभावो भवत्येवेति विचिन्त्य यथाप्रसङ्गं लिपिकाराणां (लेखकानां) कृते निर्देशग्रन्था विहिता मनीषिभिः। लेखकः सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदश्च स्यादिति शास्त्रीयनिर्देशः–

**सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः।**
**लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै॥**

**शीर्षोपेतान् सुसम्पूर्णान् शुभश्रेणिगतान् समान्।**
**अक्षरान् वै लिखेद् यस्तु लेखकः स वरः स्मृतः।।**[5]

ग्रन्थेषु प्रक्षिप्तांशानां नैकेषु कारणेषु लिपिकाराणां प्रमादोऽप्येकम्। लिपिकारभेदात्, वृत्तपूरणसमस्यापूरणादिपरम्परया लौकिकसाहित्ये भृशं प्रक्षिप्तांशाः समाविष्टाः। संस्कृतगङ्गातः प्रक्षेपमलापसारणमावश्यकम्।

संस्कृतसाहित्ये ये ग्रन्थाः समधिकं लोकप्रियत्वं गतास्तेषु प्रक्षिप्तांशा अधिका दृश्यन्ते। यद्यपि संस्कृतसाहित्यस्य प्रत्येकं काव्यं रमणीयं वर्तते, तथापि तत्र दूतकाव्यानि समधिकं समादृतानि विद्वद्भिः। अत्र दौत्यमवलम्ब्य रचितानां काव्यानां सुदीर्घा परम्परैव प्रमाणम्। उपलब्धसाहित्येषु ऋग्वेदस्य रात्रि–श्यावाश्वसूक्ते[6] वर्णितं दौत्यं प्राचीनतमम्। दूतकाव्येषु कविभिर्दूतानां चेतनाचेतनत्वमविचारितम्, तत्र भावपक्षस्य प्राधान्यात्। काव्यजगति कविरेव प्रजापतिः। यथा तस्मै रोचते तथा विश्वं परिवर्तते–

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**[7]

अतः काव्यजगति दौत्याय चेतनाचेतनत्वमविचार्यमेव। मेघदूते महाकविकालिदासेन प्रसङ्गेऽस्मिन् मेघस्य दौत्यसमर्थनायाऽर्थान्तरन्यासः प्रस्तुतः–

**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।**[8]

घटकर्परकविप्रणीते घटकर्परकाव्येऽपि मेघस्य दौत्यं वर्णितम्। अत्र प्रोषितपतिका नायिका नायकं प्रति मेघेन सन्देशं प्रेषयति। मेघदूतघटकर्परकाव्ययोर्वर्णितेषु विषयेषु बहुत्र साम्यं दृश्यते। किन्तु, उभयोः किं काव्यं प्रथमं रचितमिति विनिगमनं कठिनम्।

घटकर्परः कालिदासश्चोभावपि विक्रमादित्यस्य सभापण्डितावभूताम्–

**धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।**
**ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य।।**[9]

घटकर्परकाव्यस्य प्रणेतृविषये वैमत्यं वर्तते विद्वत्सु। काव्यस्यास्य टीका-काराभ्यामभिनवगुप्तकमलाकरभट्टाभ्यां काव्यमिदं कालिदासविरचितमिति प्रत्यपादिषतम्।

घटकर्परनाम्ना ग्रन्थद्वयमुपलभ्यते–घटकर्परकाव्यम्, नीतिसारश्च। नीतिसारस्यैकस्मिन् श्लोके कालिदासस्यालोचना[10] वर्तते–

**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोरिति यो बभाषे।**
**नूनं न दृष्टं कविनापि तेन दारिद्र्यदोषो गुणराशिनाशी।।**[11]

एवं वक्तुं शक्यते यद् घटकर्परः कालिदासाद् भिन्नः कविरासीदिति। कविरयं

यमकप्रयोगेऽतीव निपुणः। घटकर्परकाव्यस्यान्ते तेन गर्वोक्तिरेकाऽभाणि–

**आलम्ब्य चाम्बु तृषितः करकोशपेयं**
**भावानुरक्तवनितासुरतैः शपेयम्।**
**जीयेय येन कविता यमकैः परेण**
**तस्मै वहेयमुदकं घटकर्परेण॥**[12]

गर्वोक्त्याऽनया प्रतीयते यत् तद्रचनायाः प्राक् केनापि कविनैवंविधं यमककाव्यं न रचितमिति। कालिदासविरचितस्य रघुवंशमहाकाव्यस्य नवमे सर्गे यमकप्रयोगोऽतीव रमणीयः। न वक्तुमशक्यं यद् घटकर्परस्य गर्वोक्तेः प्रत्युत्तररूपेण महाकविना कालिदासेन यमकविन्यासो विहित इति।

विप्रलम्भवर्णने यमकनिबन्धनमनुचितमिति शास्त्रीयनिर्देशः–

**ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम्।**
**शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥**[13]

किन्तु, घटकर्परकाव्ये सर्वत्र यमकनिबन्धनं स्वाभाविकं प्रतीयते। अतोऽक्लिष्टयमके नात्र रसनिष्पत्तिर्बाध्यते। वल्लभाश्लेषोऽपि तथा मोदार्थं न यथाऽक्लिष्टयमकं वचो भवति–

**न तथा वल्लभाश्लेषो न पीयूषरसप्लुतिः।**
**यथा भवति मोदार्थमक्लिष्टयमकं वचः॥**[14]

मानाङ्ककविविरचिते 43 पद्यात्मके वृन्दावनकाव्येऽपि घटकर्परकाव्यमिव यमकचमत्कारो दरीदृश्यते। मदनकविना घटकर्परकाव्यस्य पङ्क्तीरादाय समस्यापूर्तिस्वरूपं कृष्णलीलाकाव्यं विरचितम्।[15] एवं वक्तुं शक्यते यद् घटकर्परेणाभिप्रेरितैर्बहुभिः कविभिर्यमककाव्यानि रचितानि। इत्थं घटकर्परकाव्यस्य लोकप्रियत्वमभिव्यज्यते।

काव्यस्यास्य लोकप्रियत्वादनेकैष्टीकाकृद्भिष्टीकामालाभिः काव्यमिदमलङ्कृतम्। टीकाकारा न केवलं व्याख्यातारः अपितु पाठसम्पादका अपि भवन्ति। महाभारतस्य भारतभावदीपाख्यटीकायां टीकाकारेण नीलकण्ठचतुरेण स्वीयश्रमप्रतिपादनव्याजेन टीकाकर्तृणां कृते आदर्शसरणिः प्रतिपादिता–

**बहून् समाहृत्य विभिन्नदेश्यान् कोशान् विनिश्चित्य च पाठमग्र्यम्।**
**प्राचां गुरूणामनुसृत्य वाचमारभ्यते भारतभावदीपः॥**

यद्यपि भारतभावदीपकारस्योक्तिरियम्, किन्तु कोशानां समाहरणं पाठभेदेषु पाठविनिश्चयनञ्च कस्यचिदपि टीकाकारस्य कृतेऽनिवार्यम्। एवं कस्यचिदपि ग्रन्थस्य

पाठसम्पादने पाठाबोधने च टीकानां महत्युपयोगिता वर्तते। किन्तु, टीकास्वपि पाठभेदाल्लिपिकारजन्यदोषाच्च तत्पाठसम्पादनमावश्यकम्।

घटकर्परकाव्यस्य महती टीकासम्पत्तिर्विद्यते। तासु टीकासु प्रकृताप्यन्यतमा। टीकेयं जम्मू–कश्मीरप्रान्तस्थरणवीरसंस्कृतानुसन्धानसंस्थाने विद्यमानां मातृकाम् (मातृकाक्रमाङ्कः–772) आधृत्य सम्पादिता। अस्याष्टीकाया एकैव मातृका लब्धा। तत्रापि टीकायास्तथा च तत्कर्तुर्नाम नोल्लिखितम्। मातृकेयं 1897 वैक्रमाब्दे लिपिकारेण गणेशेन लिखिता।

विदन्त्येव विद्वांसो यत् शक्तिः कवित्वबीजरूपः संस्कारविशेषः।[16] शक्त्यैव कविमनसि व्यङ्ग्यव्यञ्जनक्षमः शब्दः स्फुरति। कविष्विव टीकाकर्तृष्वपि काचिद् विलक्षणा शक्तिरपेक्ष्यते। शक्त्या टीकाकृद्धृदये कविप्रयुक्तशब्दस्थ भावार्थः स्फुरति। काचिदपि टीका तत्कर्तुर्वैदुष्यस्य परिचायिका भवति। प्रकृतायां टीकायां कविप्रयुक्तशब्दा विविधप्रकारेण विवेचिताः। टीकायामस्यां यथाप्रसङ्गं कविप्रयुक्तशब्दानां व्याकरणात्मकं विवेचनमपि दृश्यते। 13तमस्य पद्यस्य टीकायां टीकाकारस्य प्रातिभप्रकर्षो विशेषेण दृश्यते।

टीकाया अस्याः सम्पादने बहुत्र काठिन्यमनुभूतम्, एकस्यैव मातृकाग्रन्थस्य सत्त्वात्। यत्र कुत्रचिदपि कश्चित् पाठोऽधिकः प्रतीतस्तत्पाठः कोष्ठके प्रदत्तः। क्वचित्तु पाठस्यास्पष्टतया टीकाकारस्य तात्पर्यं नावगतम्। अतस्तत्पाठस्याग्रे कोष्ठके प्रश्नवाचकं चिह्नं प्रदत्तम्। यत्र कुत्रचिदपि मूलपाठे संशोधनं विहितं तत्र टिप्पण्यां मातृकापाठस्योल्लेखो वर्त्तते।

महता प्रयत्नेन विहितेऽपि संशोधने याः काश्चन त्रुटयो मम मतिदोषादक्षर-संयोजकदोषाद् वा भवेयुस्ताः सद्भिः प्रमार्जनीयाः सूचनीयाश्च। अहं तेषामुपकारं मंस्ये।

**बबुआ नारायण मिश्रः**

सम्पादकः

## सन्दर्भ

1. मौखिक महाकाव्य, प्रकाशकम्–इन्दिरागाँधीराष्ट्रियकलाकेन्द्रम्, संस्करणम्–2001
2. काव्यप्रकाशः, प्रथमोल्लासः
3. कविकण्ठाभरणम्, 2.3
4. द्रष्टव्यम्– शीलदूतस्य भूमिका, प्रधानसम्पादकः– प्रो.सागरमलजैनः,
   प्रकाशम्– पार्श्वनाथशोधपीठम्, वाराणसी
5.
6. ऋग्वेदः, 5.63–64
7. अग्निपुराणम् , 339.10
8. मेघदूतम्
9. ज्योतिर्विदाभरणम्, 22.8
10. कालिदासस्य निम्नलिखितश्लोकस्याऽऽलोचना
    ''अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
    एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।'' कुमारसम्भवम्, 1
11. नीतिसारः, श्लोकसङ्ख्या – 16
12. घटकर्परकाव्यम्, श्लोकसंख्या – 22
13. ध्वन्यालोकः, 3
14. रसार्णवालङ्कारः
15. द्रष्टव्यम् – भगवतीलालराजपुरोहितस्य 'घटकर्पर' इति ग्रन्थस्य भूमिका।
16. काव्यप्रकाशः, 1.3 कारिकाया वृत्तिः।

***

# श्लोकसूची


| श्लोकः | पृष्ठसं. |
|---|---|
| निचितं खमुपेत्य | 63 |
| हंसा नदन्मेघभयाद् | 64 |
| मेघावृतं निशि | 64 |
| सतडिज्जलदार्पितं | 65 |
| क्षिप्रं प्रसादयति | 66 |
| छादिते दिनकरस्य | 67 |
| सर्वकालमवलम्ब्य | 67 |
| ब्रूत तं पथिकपांशुलं | 68 |
| हंसपंक्तिरपि नाथ | 69 |
| नीलशष्पमभिभाति | 70 |
| मेघशब्दमुदिताः | 71 |
| किं कृपापि तव | 71 |
| कुसुमितकुटजेषु | 72 |
| मार्गेषु मेघसलिलेन | 74 |
| सुसुगन्धितया | 75 |
| तत्साधु यत्त्वां | 76 |
| नवकदम्ब | 76 |
| तरुवर विनतास्मि | 77 |
| कुसुमैरुपशोभितां | 78 |
| तासामृतुः सफल | 79 |
| एतन्निशम्य | 79 |
| आलम्ब्य चाम्बुतृषितः | 80 |


***

# घटकर्परकाव्यम्

**यस्याः पतिर्देशान्तरं[1] गतस्तां नायिकां पञ्चभिः[2] श्लोकैरभिधत्ते–**

**निचितं खमुपेत्य नीरदैः**
**प्रियहीनाहृदयावनीरदैः।**
**सलिलैर्निहितं रजः क्षितौ**
**रविचन्द्रावपि नोपलक्षितौ॥1॥**

**निचितेत्यादि।** हे कुन्दसमानदन्ति![3] नीरदैः उपेत्य खं निचितम्।[4] कुन्दानां[5] पुष्पाणि कुन्दानि[6] तैः समानाः दन्तास्ताम्बूलभावद्विरहिण्याः।[7-8] आगत्य गगनं व्याप्तं (।) सरसैर्मेघैः (।) खमिव तव नायकः सरसस्त्वामाश्वासयिष्यतीति भावः। भर्त्तृहीनानां हृदयलक्षणा पृथ्वी तद्रदैः। रद विलेखने। विदारकैर्मेघैः। किं च (।) सलिलैर्जलैः क्षितौ रजः निहितं स्थापितम्।[9] क्षितेः रज इत्यर्थः। रजसः पूर्वविस्तृतत्वादिदानीं[10] तत्स्थापने सुखमागमिष्यतीति[11] ध्वनितम्।[12] किञ्च[13] रविचन्द्रौ[14] न दृष्टौ जनैरिति शेषः। अपिना तेजसित्वबोधः।[15] मेघैराच्छादितत्वान्नभस्तयोश्वा (?)। अनेन सर्वथा पथिकयोस्तयोरपि निजप्रेयसीसमाश्वासनायागमनं प्रतीयते। तद्वत्तवाश्वासनाय सोऽप्यागमिष्यति[16] शीघ्रं चिरपथिक इति ध्वनिः। तयोश्चोदयास्ताज्ञाने रतासक्तकामिनां

**सन्दर्भाः**

1. देशांतरं
2. पंचभिः
3. कुंदसमानदंति
4. निचितं
5. कुंदानां
6. कुंदानि
7. दंता
8. तांवूला
9. स्थापितं
10. दांनी
11. आगमिष्यती
12. ध्वनितं
13. किं च
14. चंद्रौ
15. वोधः
16. सोप्पा

रात्रिदिनाज्ञानमित्यपि[1] ध्वनिः। अन्यसुरतदर्शनं स्वस्वेच्छोत्पादकमतस्तयोस्तदर्थगमनं ज्ञात्वा तवापि पतिरचिरमागमिष्यतीति ध्वनिः। षड्विषमेऽष्टौ समे कला इति लक्षणाद्वैतालीय[2] च्छन्दः।[3]

**हंसा नदन्मेघभयाद् द्रवन्ति[4]**
**निशामुखान्यद्य[5] न चन्द्रवन्ति।[6]**
**नवाम्बुमत्ताः[7] शिखिनो नदन्ति[8]**
**मेघागमे कुन्दसमानदन्ति[9]॥2॥**

किञ्च[10] अद्य मेघागमे हंसा नदन्मेघः गर्जन् घनः तद्भयाद् द्रवन्ति पलायन्ति[11] (।) मानससरसि। अनेन तिर्य्यञ्चोऽपि[12] कान्ताय[13] गच्छन्ति किं त्वदीयो मनुष्य इति ध्वनिः। अद्य रात्रेर्मुखानि प्रदोषाः न सचन्द्राः।[14] सोऽपि[15] कान्ताश्वासनाय[16] गतः। किञ्च[17] मयूराः नवजलमत्ताः हृष्टाः शब्दायन्ते।[18] न च मयूराः स्वकान्ता[19] आकारयन्ति।[20] त्वदीयोऽप्याकारयिष्यतीति[21] ध्वनिः। तेन मम गमनासामर्थ्ये किमाधिक्य-मिति वाच्यम्।[22] ते वयमागच्छाम इति वदन्तीति ध्वनिः।[23] इन्द्रवज्रेयम्।[24]

**मेघावृतं निशि न भाति नभो वितारं**
**निद्राभ्युपैति च हरिं सुखसेवितारम्।[25]**

---

**सन्दर्भाः**

1. त्यपि
2. यं
3. च्छंदः
4. द्रवंति
5. पद्य
6. च्रंद्रवंति
7. नवांवु
8. नदंति
9. कुंद
10. किं च
11. पलायंति
12. तिर्य्यंचोपि
13. कांताय
14. चंद्राः
15. सोपि
16. कांता
17. किं च
18. शब्दायंति
19. कांता
20. आकारयंति
21. प्पा
22. वाच्यं
23. वदतीति
24. इंद्रवज्रेयं
25. सेवितारं

**सेन्द्रायुधश्च[1] जलदोऽद्य[2] रसन्निभानां**

**संरम्भमावहति[3] भूधरसन्निभानाम्[4]॥3॥**

हे कुन्दसमानदन्ति![5] रात्रौ मेघैर्व्याप्तं खं न शोभते तारारहितत्वात्। अचेतनं गगनमपि ताराभावाद्यथा तथा त्वदीयोऽपि[6] त्वां विना न शोभते। किञ्च[7] निद्रा हरिं प्राप्नोति वर्षाणां तच्छयनकालत्वात्। सुखसेवितारम्।[8] सुखस्य सेविता सुखसेविता तं जनपालनादिव्यासङ्गं[9] विमुच्य सोऽपि[10] लक्ष्मीसहितस्सुखी तथा तवापि रसिकः। अन्यच्च मेघोऽद्य[11] रसन्[12] जलं स्रवन् इभानां गजानां क्रोधं जनयति। सेन्द्रायुधः[13] सधनुः भूधरसन्निभानां तेन प्रोषितेभानां मध्ये सकोपोऽपि[14] सविरहः सन्नागमिष्यतीति ध्वनिः। प्रतिदन्तिगर्जनभ्रान्त्या[15-16] वा। वसन्ततिलकेयम्।[17]

**सतडिज्जलदार्पितं नगेषु**

**स्वनदम्भोधरभीतपन्नगेषु।[18]**

**परिधीररवं जलं दरीषु**

**प्रपतत्यद्भुतरूपसुन्दरीषु॥4॥**

हे कुन्दसमानदन्ति![19] सतडिज्जलदार्पितं जलं परिधीररवं परितः गम्भीरशब्दं[20] यथा स्यात् तथा क्रियाविशेषणं (बा) दरीषु प्रपतति वहति।[21] यद्वा तडिद्भिस्सह विद्यमाना ये मेघास्तैरर्पितं मुक्तं जलं नगेषु दरीषु च। अनेन जलदानां नायकत्वं

---

**सन्दर्भाः**

1. सेंद्रायुधश्च
2. जलदोध
3. संरंभ
4. सन्निभानां
5. हे कुंद.
6. त्वदीयोपि
7. किं च
8. सुखसेवितारं
9. व्यासंगं
10. सोपि
11. मेघोऽधः
12. ञ्रसन्
13. सेंद्रायुधः
14. सकोपोपि
15. दंति
16. भ्रांत्या
17. वसंततिलकेयं
18. स्वनदंभोधर
19. हे कुंद.
20. गम्भीर
21. बहति

व्यज्यते विद्युल्लतानां नायिकात्वं च। अतस्सोऽपि[1] तानेवमवलोक्यागमिष्यतीति ध्वनिः। वसन्तमालिकेयम्[2] औपच्छन्दसिकं[3] वा।

**क्षिप्रं प्रसादयति सम्प्रति[4] कोऽपि[5] तानि**
**कान्तामुखानि[6] रतिविग्रह (।) कोपितानि।**
**उत्कण्ठयन्ति[7] पथिकान् जलदास्स्वनन्तः[8]**
**शोकः (कोपः) समुद्भवति तद्वनितास्वनन्तः[9]॥5॥**

हे कुन्दसमानदन्ति![10] सम्प्रति[11] वर्षर्त्तौ कोऽपीति[12] जात्येकवचनम्।[13] तानि रतिविग्रहकोपनत्वेन सौन्दर्यातिशयशालित्वेन[14] प्रसिद्धानि। कान्तामुखानि[15] मानिनीवदनानि क्षिप्रं शीघ्रं प्रसादयति प्रसन्नीकरोति। अस्मिन् वर्षर्त्तौ मानिनीकोपमुत्पाद्यानुनयतीति यावत्। अतस्सोऽपि[16] त्वत्प्रसादनार्थमागन्तेति[17] व्यज्यते। कथम्भूतानि[18] रतिविग्रहकोपितानि सुरते प्रीतिकलहेन कोपस्संयातो येषां तानि, किञ्च[19] स्वनन्तो[20] गर्ज्जन्तो[21] मेघाः पान्थानुत्कण्ठयन्ति[22] उत्कण्ठावतः[23] कुर्वन्तीत्यर्थः। तेन नायको हि तद्दर्शनोत्कण्ठित[24] आगन्तेति[25] ध्वनिः। किञ्च[26] तद्वनितासु अनन्तः[27] महान् शोकः विरहदुःखं

---

**सन्दर्भाः**

1. सोपि
2. वसंतमालिकेयं
3. औपच्छंदसिकं
4. संप्रति
5. कोपि
6. कांता
7. उत्कंठयंति
8. स्वनंतः
9. स्वनंतः
10. हे कुंद.
11. संप्रति
12. कोपीति
13. वचनं
14. सौंदर्या
15. कांता
16. सोपि
17. गंतेति
18. कथं
19. किं च
20. स्वनंतो
21. गर्ज्जंतो
22. पांथानुत्कंठयंति
23. उत्कंठावतः
24. कुर्बंतीत्यर्थः
25. कंठित
26. आगंतेति
27. किं च
28. अनंतः

समुद्भवति उत्पद्यते। अनेन त्वन्नायकस्त्वद्विरहमसहमान आगन्तेति[1] ध्वनिः। वसन्ततिलका।[2]

**एवं सहचर्य्याश्वासिता नायिका मेघानाह–**

**छादिते दिनकरस्य भावने**
**खाज्जले पतति शोकभावने।**
**मन्मथे हृदि हन्तुमुद्यते[3]**
**प्रोषितप्रमदयेदमुद्यते॥6॥**

**छादित इति।** दिनकरस्य भावने दीप्तिवने वृक्षसमुदायवाचिनो वनपदस्य समूहे लक्षणा। छादिते सति मेघैरिति शेषः। गगनाद्वारिणि पतति सति शोकस्य भावने उत्पादके कामे। हृदि हन्तुं[4] पीडयितुमुद्युक्ते सति देशान्तरगतभर्तृकया[6] इदं वक्ष्यमाणमुद्यते[6] उच्यते। मेघान्प्रतीति शेषः। रथोद्धता।

**किमुवाच–**

**सर्वकालमवलम्ब्य[7] तोयदा**
**आगताः[8] स्थ दयितो[9] गतो यदा।**
**निर्घृणेन परदेशसेविना**
**मारयिष्यथ ह तेन मां विना॥7॥**

हे मेघाः![10] यूयं सर्वकालमवलम्ब्य[11] दयितगमनव्यतिरिक्तमतिक्रम्य[12] यदा प्रेयान् प्रोषितस्तदा आगताः[13] स्थ प्राप्ताः[14] स्थ। मध्यमपुरुषबलाद्यूयमित्यध्याहार्यम्।[15]-[16] ईदृशाः परोपकारनिरता भवन्तोऽधुना[17] (मयि) निर्घृणेन निर्दयेन निर्ज्जलेन वा अत एव

---

**सन्दर्भाः**

1. आगंतेति
2. वसंत
3. हंतु
4. हंतुं
5. देशांतर
6. वक्ष्यमाणं
7. मवलंब्य
8. आगता
9. दयिते
10. मेघा
11. लंव्य
12. रिक्तं
13. आगता
14. प्राप्ता
15. वला
16. हार्यं
17. भवंतो

परदेशसेविना विना मां मारयिष्यथ। ह इति कष्टे। अयमप्यपकारस्तस्य कर्त्तव्यापकारकारित्वात्। मारयिष्यथ न तेनेति पाठे काकुः। न मारयिष्यथ किम्,[1] अपि तु मारयिष्यथ[2] एव। इयं रथोद्धता।

**ब्रूत[3] तं पथिकपांशुलं घना**
**यूयमेव पथिशीघ्रलङ्घनाः।[4]**
**अन्यदेशरतिरद्य मुच्यतां**
**साऽथवा[5] तव वधूः किमुच्यताम्[6]॥8॥**

हे घनाः! यूयमेव तं कान्तं[7] ब्रूत[8] उपदिशत। पथिकेषु पांशुलं पांशून्दोषान् लाति अङ्गीकरोतीति[9] पांशुलो[10] मलिनोऽधम[11] इति यावत्। तं पान्थाधममित्यर्थः।[12] एतादृशं प्रति उपदेश आवश्यकः। अस्मास्वेव वक्तव्यः प्रार्थनादरः किमिति चेत्। किम्भूता[13] यूयं पथिशीघ्रलङ्घनाः।[14] लङ्घनं[15] गमनं येषां ते। अन्यस्य स्थिरतया गमनकालविलम्बेन[16] भवतः प्रेषणमुचितत्वाद्युक्तः प्रार्थनादरः। तत्र गत्वा किं वक्तव्यमिति चेदाह।[17] भो पथिक! अद्य वर्षर्तौ अन्यदेशप्रीतिर्मुच्यतां त्यज्यताम्।[18] शीघ्रं स्वदेशो[19] गन्तव्य[20] इत्यर्थः। अथवा तव वधूररस्माभिः[21] किमुच्यतां वक्तुं न शक्येत्यर्थः। अनिर्वाच्यां दशां प्राप्तेति भावः। यद्वा सा किं वदतु, अस्मदुक्तमेव कर्त्तव्यम्।[22] रथोद्धता।

---

**सन्दर्भाः**

| | |
|---|---|
| 1. किं | 2. मारयिष्यथैव |
| 3. ब्रूत | 4. लंघनाः |
| 5. साचवा | 6 किमुच्यतां |
| 7. कांतं | 8. ब्रूत |
| 9. अंगी | 10. पांशुलः |
| 11. मलिन अधम | 12. पांथा |
| 13. किंभूता | 14. लंघनाः |
| 15. लंघनं | 16. विलंवेन |
| 17. चेत्तत्राह | 18. त्यज्यतां |
| 19. देशं | 20. गंतव्यम् |
| 21. वधू अस्माभिः | 22. कर्त्तव्यं |

**हंसपंक्तिरपि नाथ सम्प्रति**[1]

**प्रस्थिता वियति मानसं प्रति।**

**चातकोऽपि**[2] **तृषितोऽम्बु**[3] **याचते**

**दुःखिता पथिक सा प्रिया च ते॥9॥**

भो नाथेति सम्बोधनम्।[4] सम्प्रति[5] वर्षर्त्तौ हंससमुदाया[6] मानसं सरः प्रति आकाशे प्रस्थिताः। तिर्य्यञ्चोऽपि[7] कान्ताश्वासनाय[8] गच्छन्तीति[9] भावः। किञ्च[10] चातकः पक्षी अपि तृषितो[11] जलं याचते। जलधारामित्यार्थिकं[12] द्वितीयं कर्म्म ज्ञेयम्।[13] यद्वा, अम्बु[14] अमृतं चातकः कान्ताधरामृतपानं[15] याचते। प्रियां प्रतीति शेषः। त्वं तु अधरपानार्थं प्रेरितोऽपि न गच्छसि महती शृङ्गारानभिज्ञानतेत्युपहास्योऽसि।[16-17] किञ्च[18], भो पथिक! सा ते प्रिया[19] दुःखिता च। (यदि) सा तर्हि प्रियाऽऽश्वासनीयेत्यनेन मन्मथपीडया दशमीं[20] दशामाप्तुकामा।[21] दुःखकारणं तिर्य्यञ्चोऽपि[22] प्रियामाश्वासयन्तीति।[23] मनुपित्रा (?) अनभिज्ञाय सस्नेहत्वं दत्तम्।[24] अभिज्ञाय निःस्नेहत्वमिति स्मर्यमाणा दुःखिता। रथोद्धता।

---

**सन्दर्भाः**

1. संप्रति
2. चातकोपि
3. तृषितोंऽवु
4. संवोधनं
5. संप्रति
6 हंसमुदाया
7. तिर्य्यंचोऽपि
8. कांता
9. गच्छंतीति
10. किं च
11. तृष्मितो
12. यार्थिक
13. ज्ञेयं
14. अंवु
15. कांता
16. शृंगारा
17. हास्योपि
18. किं च
19. प्रिया आश्वासनीये
20. दशमी
21. दशामाप्तकामा
22. तिर्य्यंचोपि
23. श्वासयंति
24. दत्तं

**नीलशष्पमभिभाति कोमलं**

**वारि विन्दति[1] च चातकोऽमलम्।**

**अम्बुदैः[2] शिखिगणो[3] विनाद्यते**

**का रतिर्दयितया विनाद्य ते॥10॥**

किञ्च[4], भो पथिक! कोमलं सुन्दरं[5] हरितबालतृणमभिभाति[6] समन्ताच्छोभते।[7] भूमाविति शेषः। नन्वत्र बालतृणशब्देन[8] नीलस्यैव बोधादन्यद्वैयर्थ्यम्,[9-10] तथापि नीलपदं वर्षर्त्तुज्ञापनाय। अचेतनतृणकोमलत्वेन च कविना[11] त्वेनहीनता (?), तेन मार्गमञ्जुलत्वं[12] च सूचितम्।[13] किञ्च[14], चातक उदकममलं[15] मलहीनं विन्दति[16] (।) लभते। चातका घनमुक्तमुदकमन्तनरीक्ष[17] एवाददते। अतस्तत्र भूमिसम्बन्धाभावा-न्निर्म्मलत्वम्।[18-19] चातका (अस्मान्) उदकमिच्छन्ति,[20] तदर्थं वयमागताः। त्वदागमन-परीक्षिणी त्वं न गच्छसीत्यतोऽधमत्वं तवेति ध्वनिः। किञ्च[21], अम्बुदैर्मेघैर्मयूरसमुदायो[22] निनाद्यते शब्दं कुर्व्विति प्रेर्य्यते। अस्मद्गर्जने मयूरा नृत्यन्तीति[23] मेघानां कारणता नादे। मयूराणां मञ्जुलनादोत्सादकैरस्माभिरेव[24] प्रेर्य्यमाणो गच्छ, नोचेन्मयूरनादोत्तरं दुःखितो भूत्वा यास्यतीति विभीषिकोक्तिः। किञ्चाद्य[25] कान्तया[26] विना तव का रतिः सुखं न कापीति भावः। एवं दुःखी भूत्वा तिष्ठसि चेदतिधैर्य्यगुणस्त्वयि। रथोद्धता।

**सन्दर्भाः**

1. विंदति
2. अंवुदैः
3. शिखिगुणो
4. किं च
5. सुंदरं
6 वालतृणं
7. समंता
8. बाल
9. बोधा
10. र्थ्यं
11. कविन
12. मंजुलत्वं
13. सूचितं
14. किं च
15. उदकं
16. विंदति
17. मंतरीक्ष
18. संवंधा
19. लत्वं
20. अस्मानिच्छंति उदकमिति मूलपाठः
21. किं च
22. अंबुदै
23. नृत्यंतीति
24. मंजुल
25. किं चाद्य
26. कांतया

**मेघशब्दमुदिताः कलापिनः**

**प्रोषिताहृदयशोकलापिनः।**

**तोयदागमकृशाऽपि[1] साद्य ते**

**दुर्धरेण मदनेन साद्यते॥11॥**

किञ्चाद्य[2] (।) कलापिनो नृत्यन्मयूरा मेघशब्दमुदिता घनगर्जितसन्तुष्टाः[3] प्रोषितानां[4] हृदये शोकलापिनः देशान्तरगतभर्तृकाणां[5] नायिकानां हृदयेषु सन्तापकारका[6] ये मयूराः। यद्वा, हृदये[7] शोकं लपन्ति[8] भाषन्ते,[9] अतस्तदवस्थां ज्ञात्वा गन्तव्यम्।[10] भो पथिक! ते सा विरहानलव्याकुला प्रिया मेघागमकृशाऽपि[11] दुःखेन धर्त्तुमशक्येन मदनेन पीड्यते।[12] यद्वा, तोयदागमे वर्षर्त्तौ कृशापि एतादृशीमपि मदनः पीडयति। तत्परिहारार्थं त्वं व्रज। देवो दुर्बलघातक इति मदनस्यापि दयाभावः। त्वं तथा मा भवेति सामोपायः। रथोद्धता।

**किं कृपापि तव नास्ति कान्तया[13]**

**पाण्डुगण्डपतितालकान्तया।[14]**

**शोकसागरजलेऽद्य[15] पातितां**

**त्वद्गुणस्मरणमेव पाति ताम्[16]॥12॥**

भो पथिक! तव कान्तायां[17] कान्तयेति[18] विवक्षातः कारकाणि (कारक) इति

---

**सन्दर्भाः**

| | |
|---|---|
| 1. कृशापि | 2. किं चाद्य |
| 3. संतुष्टाः | 4. प्रेषितानां |
| 5. देशांतर | 6 संताप |
| 7. हृदय | 8. लपंति |
| 9. भाषंते | 10. गंतव्यं |
| 11. कृशापि | 12. पीडाते |
| 13. कांतया | 14. पांडुगंडपतितालकांतया |
| 15. जलेद्य | 16. तां |
| 17. कांतायां | 18. कांतयेति |

वचनादधिकरणाविवक्षया तृतीया। तेन कान्तायामित्यर्थः।[1] करुणापि नास्ति निर्दयस्य ते दयाभावात्। सदयेन तु गतमेव स्यात्। यमकभङ्गभयात्कान्तयेति[2-3] केचित्। तन्न। कवेरसामर्थ्यापत्तेः। कभम्भूतया,[4] विरहेण पाण्डू[5] गण्डौ[6], तयोः पतिता इतस्ततो विस्तृताः साधनाभावात् केशान्ता[7] यस्याः। एतादृशि प्रेम्णि विरहावस्थायां जीवने हेतुमाह। अद्य त्वद्गुणानां स्मरणमेव[8] सदयो मयि प्रीतिसान्द्रोऽधुनागमिष्यत्येवेति[9] स्मरणं तां रक्षति। शोकसागरजले निपातितां शोक एव समुद्रस्तज्जलमिवेत्युपमानान्तत्वात्[10] त्वद्विरहेणेति शेषः। समुद्रमपि गुणेन रज्ज्वा तरति। रथोद्धता।

**पुनरपि तं मत्सन्देशं[11] ब्रूतेत्याह–**

**कुसुमितकुटजेषु काननेषु**
**प्रियरहितेषु समुत्सुकाननेषु।**
**वहति च कलुषे जले नदीनां**
**किमिति च मां समवेक्षसे[12] न दीनाम्[13]॥13॥**

हे कान्त![14] त्वं मां किमिति कस्मात्कारणान्न समवेक्षसे संपश्यसि। केषु सत्सु काननेषु वनेषु। कुसुमानि संयातानि येषां ते तादृशाः कुटजा[15] वृक्षविशेषाः। कुटजो वृक्षभेदे स्यादगस्त्यद्रोणयोरिति प्रकाशः येषु तानि तादृशेषु सत्सु। पुनः केषु सत्सु, काननेषु वनेषु प्रियरहितेषु। कामिनीजनेष्विति शेषः। किम्भूतेषु[16] कामिनीजनेषु समुत्सुकाननेषु समुत्सुकानि निजकान्तेषूत्कण्ठितानि[17] आननानि येषां तेषु। इदमपि स्वाभिप्रायेण तस्मात् कामिनीमुखस्य यथानुत्कण्ठितत्वं[18] भवति तथा विधेयम्।[19] यद्वा प्रियेति

**सन्दर्भाः**

1. कांता
2. भंग
3. कांत
4. कथंभूतया
5. पांडूविरहेणेति मूले पाठक्रमः
6. गंडौ
7. केशांता
8. स्मरणमपि
9. सांद्रो
10. मानांतत्वात्
11. संदेशं
12. समवेक्ष्यसे
13. दीनां
14. कांत
15. कुटजाः
16. किंभूतेषु
17. निजकांतेषूत्कंठितानि
18. कंठितत्वं
19. विधेयं

भर्तृपदेन सम्बोधनम्।[1] अत्र पक्षे पूर्ववत् कुसुमिते इति सप्तम्यन्तं[2] लापयित्वा अग्रिमपदानि काननविशेषणानि। किम्भूतेषु[3] काननेषु। कस्य जलस्य। कं शिरो जलमाख्यातमित्येकाक्षर निघण्टुः।[4] आननानि मुखानि आधारत्वात् स्थानानि इति यावत्। तेषु काननेषु सजलेष्वित्यर्थः। पुनः किम्भूतेषु[5] काननेषु समुत्सु मुदा प्रीत्या घटितेषु। पुष्पाणां विकसनेन हास्यनिवेदकत्वम्।[6] पुनः किम्भूतेषु[7] काननेषु रहितेषु वियुक्तेषु। कामिनीजनैरिति शेषः। अनेन वनानां जलाद्यनेकगुणशोभितत्वात् कामिन्यादिजनराहित्यमात्रेण शोभा मा भूदिति त्वदागमनेन च तद्वने क्रीडावशादस्मत्सान्निध्येन सर्वाऽपि[8] शोभा सम्पत्स्यते[9] इत्यवश्यमागन्तव्यमिति[10] स्फुट एवाशयोऽभिव्यज्यते। यद्वा केषु सत्सु कामिनीजनेषु काननेषु अधिकरणसप्तमीयम्।[11] समुत्सु मुदा सह वर्त्तमानेषु सत्सु। अनेन यथा स्वभर्त्तृभिः सहिताः कामिन्यः काननादौ क्रीडन्ति[12] तथाहमपि त्वदागमने भविष्यामीति सत्वरमागन्तव्यमित्याशयोऽपि[13-14] व्यङ्ग्यः।[15] किम्भूतेषु[16] काननेषु? कुसुमितकुटजेषु। अनेन काननानां भोगयोग्यत्वं सूचितम्।[17] किम्भूतेषु[18] कामिनीनेषु कानजनेषु, केन सुखेन युक्तानि आननानि येषां तेषु। मध्यमपदलोपिसमासात्। वियोगाभावात्सुखितानीत्यर्थः। यद्वा केन जलेन युक्तान्याननानि येषां तेषु, विपरीतसुरतश्रमस्वेदबिन्दुयुक्तानि।[19] पावके च मयूरे च सुखे शीर्षे जले च कम्।[20] पुनः किम्भूतेषु[21] कामिनीजनेषु प्रियरहितेषु। सर्वेषु सुन्दरत्वात्[22] सर्वेषां प्रियः

---

**सन्दर्भाः**

| | |
|---|---|
| 1. संवोधनं | 2. सप्तम्यंतं |
| 3. किंभूतेषु | 4. निघंटु |
| 5. किंभूतेषु | 6. निबेदकत्वं |
| 7. किंभूतेषु | 8. सर्वापि |
| 9. संपत्स्यते | 10. गंतव्य |
| 11. सप्तमीयं | 12. क्रीडंति |
| 13. गंतव्य | 14. शयोपि |
| 15. व्यंग्यः | 16. किंभूतेषु |
| 17. सूचितं | 18. किंभूतेषु |
| 19. विंदु | 20. कं |
| 21. किंभूतेषु | 22. सुंदर |

कामस्तज्जो रः अग्निस्तत्र हितेषु सुखरूपेषु मदनजनिततापशान्त्यर्थं[1] कामिनीजन एव सुखावह इत्यर्थः। यद्वा प्रियाणां भर्त्तृणां रः सन्तापः[2] अर्थान्मदनजन्य इत्यर्थः। तत्र हितो भर्त्तृणां सन्तापशान्त्यर्थं[3] कामिनी जन एव हितः सुखकारी समर्थः। यद्वा प्रियाणां रः कामः, तत्र हितो भर्त्तृणां शरीरालिङ्गने[4] सुखावह इत्यर्थः। रश्च कामे नले सूर्ये इति निघण्टुः।[5] पुनः कस्मिन् सति नदीनां कलुष आविले बहुले[6] जले वहति सति। यथा नदीभिः स्वकान्तं[7] प्रति गम्यते तथा त्वमपि गच्छेत्याशंक्याह। किम्भूतां[8] मां दीनां सर्वेषां[9] सुखवशात् स्वस्य विरहात्। पुष्पिताग्रा वृत्तिः।

**साम्प्रतं[10] काचित् सखीमाहानङ्गबाणाकुलाङ्गी[11]—**

**मार्गेषु मेघसलिलेन विनशितेषु**
**कामो[12] धनुः स्पृशति तेन विना[13] शितेषु।**
**गम्भीरमेघरसितव्यथिता[14] कदाऽहं[15]**
**जह्यां सखि प्रियवियोगजशोकदाहम्[16]॥14॥**

हे सखि! अहं प्रियवियोगाज्जातं शोकाग्निं कदा जह्यां त्यजेयम्।[17] केषु सत्सु जलदमुक्ततोयेन मार्गेषु पथिषु विनाशितेषु रुद्धेषु। अनेन एतावत्कालं तदागमनाशया स्थितम्, अधुना तु नदीपूर्णत्वात् पङ्काकुलत्वाच्च[18] मार्गाणां विषमत्वे तदागमनाभावबोधात्[19] कथं शोकनाशः। तदभावे दशमदशाप्राप्तिरिति ध्वनिः। कस्मिन् सति, तेनेत्यनेन निर्दयत्वबोधः।[11] भत्रा विना कामो धनुः स्पृशति सज्यं कुर्वति। मां लक्षीकृत्येति

**सन्दर्भाः**

1. शांत्यर्थं
2. संतापः
3. संतापशांत्यर्थं
4. लिंगने
5. निघंटुः
6. वहुले
7. कांतं
8. किंभूतां
9. सर्वेषु
10. सांप्रतं
11. नंगवाणा
12. कामे
13. बिना
14. गंभीर
15. कदाहं
16 दाहं
17. त्यजेयं
18. पंका
19. वोधात्
20. वोधः

शेषः। किम्भूतं[1] धनुः शितेषु, शितः तीक्ष्ण इषुर्यस्मिन् तथा। किम्भूताऽहं[2] गम्भीरं[3] यन्मेघस्य रसितं घनगर्जितं तेन व्यथिता व्यथा सञ्जाता[4] यस्याः सा दुःखितेत्यर्थः। वसन्ततिलकेयम्।[5]

**पुनरपि सखीं मेघसमक्षमाह–**

**सुसुगन्धितया[6] वने जितानां**
**स्वन[7]दम्भोधरवायुवीजितानाम्।[8]**
**मदनस्य कृते निकेतकानां[9]**
**प्रतिभान्त्यद्य[10] वनानि केतकानाम्।[11]।15॥**

हे सखि! अद्य केतकानां केतकीपुष्पाणि केतकानि तेषां वनानि समूहाः प्रतिभान्ति[12] शोभन्ते।[13] (सं।) प्रतिभानि (?) वा भवन्ति।[14] परपीडाकरणे धृष्टानि। कीदृशानां केतकानां सुतरां सुगन्धीनि[15] तेषां भावस्तत्तथा, तया अवने जितानां व्याप्तानाम्।[16] वने अजितानामिति पदच्छेदे वने अजितानां सर्वोत्कृष्टत्वादन्यपुष्पैरपराजितानाम्।[17] पुनः किम्भूतानां[18] स्वनन्तो[19] गर्जन्तो[20] ये मेघास्तत्सम्बन्धिवायुना[21] वीजितानाम्[22] ईषत्कम्पितानाम्।[23] पुनः किम्भूतानां[24] मदनस्य कृते कामार्थं निकेतकानां गृहाणामित्यर्थः।

---

**सन्दर्भाः**

1. किंभूतं
2. किंभूताहं
3. गंभीरं
4. संजाता
5. वसंततिलकेयं
6. सुसुगंधतया
7. स्वनदंभो
8. वीजितानां
9. निकेतनानां
10. प्रतिभांत्यद्य
11. केतकानां
12. भांति
13. शोभंते
14. भवंति
15. सुगंधीनि
16 व्याप्तानां
17. जितानां
18. किंभूतानां
19. स्वनंतो
20. गर्जंतो
21. संवंधि
22. वीजितानां
23. कंपितानां
24. किंभूतानां

कित निवासे, निकेतयन्तीति[1] निकेतनानि। मदनस्ते शरीरशीतलगृहेषु स्थित्वा परान् पीडयति। अतस्तवेयं कीर्त्तिः। वसन्तमालिकेयं[2] वृत्तिः।

**इदानीं प्रस्तुतं विहायाप्रस्तुतं[3] तरुं कामव्यामोहात्[4] प्रार्थयते—**

**तत्साधु यत्त्वां सुतरुं ससर्ज्ज**

**प्रजापतिः कामनिवास सर्ज्ज।**

**त्वं मञ्जरीभिः[5] प्रवरो वनानां**

**नेत्रोत्सवश्चासि सयौवनानाम्[6]॥16॥**

भो कामनिवास कन्दर्पनिलय[7] सर्ज! शालसाले तु सर्जके। प्रजापतिर्वेधाः सुतरुं त्वां ससर्ज (।) सृष्टवान् (।), तत्साधु युक्तम्।[8] सुतरुत्वं दर्शयति। यतः कारणात्त्वं मञ्जरीभिर्वल्लरीभिर्वनानां[9] प्रवरः श्रेष्ठोऽसि।[10] (चेत्यपरं) सयौवनानामित्यनेन[11] स्त्रीपुंसयोग्रहणम्।[12] नेत्रोत्सवः[13] (।) आनन्दजनकत्वात्।[14] नेत्राणामुत्सवः उद्भवः ईदृशस्य तव मत्पीडाजनकत्वमनुचितमिति भावः। यद्वा श्रेष्ठस्य[15] तव न स्वतो मत्पीडाजनकत्वं किन्तु[16] कामसङ्गत्येति[17] ध्वनिः। उपजातिच्छन्दः।[18]

**नवकदम्ब[19] शिरोऽवनतास्मि ते**

**वसति यन्मदनः कुसुमस्मिते।**

---

**सन्दर्भाः**

1. निकेतयंति
2. वसंत
3. विहाय अप्रस्तुतं
4. व्यमोहात्
5. मंजरीभिः
6. सयौवनानां
7. कंदर्प
8. युक्तं
9. मंजरीभि
10. श्रेष्टोसि
11. सयौवनानां अनेन
12. पुं.स्त्री ग्रहणं
13. नेत्रोत्सबः
14. आनंद
15. श्रेष्टस्य
16. किं तु
17. संगत्येति
18. छंदः
19. कदंव

**कुटज किं कुसुमैरुपहस्यते**

**निपतितास्मि सुदुःप्रसहस्य ते॥17॥**

हे नवकदम्ब![1] अहं तुभ्यं शिरोऽवनतास्मि कृतनमस्कारेत्यर्थः। यद्यस्मात्कारणात्ते पदमत्रापि योज्यम्।[2] तव कुसुमस्मिते पुष्पैर्विकसिते त्वयि मदनस्तिष्ठति। दुष्टसङ्गान्मम[3] पीडां मा अदाः। अथवा नवस्य बालस्य परपीडाजननेऽविवेकिनः कदम्बस्य[4] कुमातृकस्य दुष्टसङ्गिनो[5] दुःखजननं सुयुक्तमेव।हे कुटज! कुसुमं कृत्वा किम्[6] उपहस्यते। त्वया मामेव दुःखं दत्वा मामेवोपहससीति महदौचित्यमित्याशयः। अतः सुदुःप्रसहस्य सुतरां सोढुमशक्यतेति पतिताऽस्मि[7] (।) कृतनमस्काराऽस्मि।[8] अतो मा यच्छ[9] दुःखम्।[10] द्रुतविलम्बितं[11] छन्दः।[12]

**इदानीं नायिका निर्दयं प्रार्थयते—**

**तरुवर विनतास्मि ते सदाऽहं[13]**

**हृदय मे प्रकरोषि किं सदाहम्।[14]**

**तव कुसुमनिरीक्षणे पदेऽहं[15]**

**विसृजेयं सहसैव नीप देहम्[16]॥18॥**

हे तरुवर! अहं ते तुभ्यं सदा निरन्तरं[17] विनताऽस्मि।[18] एवं सत्यपि मे हृदयं किमिति सदाहं सतापं करोषि। अत्यन्तकृतघ्नस्त्वमिति20 भावः। भो नीप कदम्ब!21अहं

**सन्दर्भाः**

| | |
|---|---|
| 1. कदंव | 2. योज्यं |
| 3. संगा | 4. कदंवस्य |
| 5. संगिनो | 6. किं |
| 7. पतितास्मि | 8. रास्मि |
| 9. यछ | 10. दुःखं |
| 11. विलंवितं | 12. छंदः |
| 13. सदाहं | 14. सदाहं |
| 15. पदेहं | 16. देहं |
| 17. निरंतरं | 18. विनतास्मि |
| 19. अत्यंत | 20. कदंव |

तव कुसुमनिरीक्षणे पदे त्वत्पुष्पदर्शनपदे स्थाने सहसाऽकस्मादेव देहं विसृजेयम्।[1] यद्वा त्वत्पुष्पनिरीक्षणे स्थाने एव देहं त्यजेयमतोऽनुचितमिति[2] भावः। अत्रानुक्त-गाथाच्छन्दः।[3]

**स्वयं पुनर्विलपति। यद्वा सखीं वदति–**

**कुसुमैरुपशोभितां सितै-**
**र्घनमुक्ताम्बुलवप्रकासितैः।[4]**
**मधुनस्समवेक्ष्य कालतां**
**भ्रमरश्चुम्बति[5] यूथिकालताम्[6]॥19॥**

भ्रमरो भृङ्गो[7] यूथिकानां लतां चुम्बति,[8] तत्रैवासक्तो भवतीत्यर्थः। किं कृत्वा, मधुनः पुष्परसस्य कालतां समयतां समवेक्ष्य ज्ञात्वा। अनेन भ्रमरोऽपि[9] मधुपानसमयं[10] ज्ञात्वासक्तो मन्नायकापेक्षयाऽभिज्ञ[11] इत्यर्थध्वनिः। सितैः श्वेतैः पुष्पैरुपशोभितामित्यनेन[12] भ्रमररूपप्रियचुम्बनादेः[13] तस्याः पुष्पच्छलाद्धास्यं व्यङ्ग्यम्।[14] घनैर्मुक्ता येऽम्बुलवा[15] जलकणास्तेर्विकासितैरन्योऽपि[16] कश्चिद्रसिको भूषणादिभिरलङ्कृतां[17] कान्तां[18] चुम्बतीति[19] ध्वनिः। वैतालीसुन्दरी[20]च्छन्दः।[21]

---

**सन्दर्भाः**

1. विसृजेयं
2. मत अनुचित
3. छंदः
4. मुक्तांवु
5. चुंवति
6. लतां
7. भृंगो
8. चुम्वति
9. भ्रमरोपि
10. समयमिति
11. मन्नायिकापेक्षयाभिज्ञ
12. शोभितां अनेन
13. चुंवनादे
14. व्यंग्यं
15. ये अंवु
16. रन्योपि
17. रलंकृतां
18. कांतां
19. चुंवतीति
20. सुंदरी
21. छंदः

**पुनरपि सखीं वदति–**

**तासामृतुः सफल एव हि या दिनेषु**

**सेन्द्रा[1]युधाम्बुधर[2]गर्जितदुर्द्दिनेषु।**

**रत्युत्सवं प्रियतमैः सह मानयन्ति[3]**

**मेघागमे प्रियसखींश्च[4] समानयन्ति[5]॥20॥**

ऋतुः अर्थाद्वर्षर्त्तुः तासां सुन्दरीणां[6] हि निश्चये सफल एव[7] सार्थक एव। तासां कासां या इन्द्रायुधेन[8] वर्त्तमाना ये मेघास्तेषां गर्ज्जितानि तैर्दुर्द्दिनेषु मेघच्छन्नवाचकं दुर्द्दिनपदं छन्नमात्रे लाक्षणिकम्।[9] प्रियतमैः कामिभिः सह रत्युत्सवं मानयन्ति[10] पूजयन्ति[11] अनुभवन्ति।[12] किञ्च[13] मेघागमे प्रियास्ताः सख्यश्च, तास्ताः[14] समानयन्ति[15] आत्मतुल्याः कुर्वन्ति,[16] आत्मवद्भूषणादिभिर्भूषयन्तीत्यर्थः।[17] यद्वा मानेन आदरेण सह वर्त्तन्ते[18] यास्तादृशाः कुर्वन्तीत्यर्थः।[19] अभिमानिकामिनोरानयने सन्तोषाद्[20] भूषणदानमुचितमेवेति भावः। अनेन प्रियानयनं सखीकार्य्यं भवत्यतः सभूषणस्त्वया स आनेयस्त्वामलङ्करिष्यामीत्यर्थध्वनिः।[21]

**एतन्निशम्य विरहानलपीडिताया-**

**स्तस्या वचःखलु दयालुरपीडितायाः।**

---

**सन्दर्भाः**

1. सेंद्रा
2. धांबु
3. मानयंति
4. सखीश्च
5. समानयंति
6. सुंदरीणां
7. स्व
8. इंद्रा
9. लाक्षणिकं
10. मानयंति
11. पूजयंति
12. अनुभवंति
13. किं च
14. तास्ता
15. समानयंति
16. कुर्वंति
17. भूषयंती
18. वर्तंते
19. कुर्वंतीत्यर्थः
20. संतोषात्
21. मलंकरि

**स्वं स्वारवेण कथितं जलदैरमोघैः**

**प्रत्याययौ स गृहमूनदिनैरमोघैः॥21॥**

एवं विलपन्त्यां[1] तस्यां स नायकः ऊनदिनैरल्पदिवसैर्गृहं निजमिति शेषः। प्रत्याययौ आजगाम। किं कृत्वा, एतत्पूर्वोक्तं विरहानलेन पीडितायास्तस्याः प्रियायाः जलदेन स्वारवेण[2] स्वशब्देन स्वम्[3] आत्मानं प्रति कथितम्[4] उक्तं वचस्सन्देशं[5] निशम्य श्रुत्वा। किम्भूतायास्तस्याः[6] अपीडितायास्तत्प्राप्ताविति शेषः। किम्भूतः[7] स दयालुः, मेघवचनेन तत्कालमागमनात्। किम्भूतैरूनदिनैर्मोघैरमोघैश्च[8] तदनागमनागमनाभ्यां निष्फलैः सार्थकैश्च। केचिदिदं पद्यं कवेर्नेति वदन्ति।[9]

**इदानीं काव्यकर्त्ता स्वकाव्ये यमकनिपुणतामाकलय्य प्रतिज्ञां दर्शयितुमाह—**

**आलम्ब्य[10] चाम्बुतृषितः[11] करकोशपेयं[12]**

**भावानुरक्तवनितासुरतैः शपेयम्।[13]**

**जीयेय येन कविना यमकैः परेण**

**तस्मै वहेयमुदकं घटकर्परेण॥22॥**

भो शिष्य! अहं येन परेण द्वितीयेन कविना न त्वन्येन यमकैः जीयेय पराजयं प्राप्स्यामि शब्दालङ्कारैः[14] (।) तस्मै कवये ध्वस्तकुम्भकपालेन[15] उदकं वहेयं प्रापयेयं दुष्करमपि करिष्यामि। ननु त्वं[16] जितोऽपि[17] तथा न करिष्यसीति चेच्छपथमाह।

**सन्दर्भाः**

1. विलपत्यां
2. रवेन
3. स्वं
4. कथितं
5. संदेशं
6. किंभूताया
7. किंभूतः
8. किंभूतै ऊन
9. वदंति
10. आलंव्य
11. चांवु
12. कोष
13. सपेयम्
14. लंकारैः
15. कुंभ
16. त्व
17. जितोपि


यदि न वहेयं तर्हि भावेन चित्ताभिप्रायेणानुरक्ता याः कान्तास्तासां[1] सुरतैः शपथं कुर्य्याम्।[2] किं कृत्वा, तृषितः सन् करकोशः कुड्मलोऽञ्जलिस्तेन[3] पेयं पातुं योग्यं जलम्[4] आलम्ब्य[5] स्पृष्ट्वा अन्योऽपि जलं स्पृष्ट्वैव शपथं करोतीति भावः। यो हि यत्प्रियो भवति स तच्छपथं करोतीति[6] स्वस्यातिरसिकत्वेन तत्प्रियत्वात्तच्छपथे इत्यादरः। न च तव यमकाख्यकाव्ये ज्ञानमेवेति न्यूनता वाच्या कविनेत्युक्तत्वात्। यः कविस्तेन तु यमकादौ जेतव्योऽस्मि शास्त्रे तु शास्त्रज्ञैरित्यलं विस्तरेण।

**॥ इति घटकर्परं समाप्तम्[7] ॥**

---

**सन्दर्भाः**

1. कांता
2. कुर्य्यां
3. मलोंऽजलि
4. जलं
5. आलंव्य
6. करो। तीति
7. समाप्तं



# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि